लघु-ग्रन्थमाला

[५६]

कतिपयपाणिनिसूत्राणां विशेषव्याख्यानम्

प्रणेता

डॉ० के० वि० सोमयाजुलुः

वरिष्ठ-व्याख्याता

श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठे

जगन्नाथपुर्याम्

M-5333

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वि० सं० २०५४

व्याकरण

LAGHU-GRANTHAMĀLĀ

[Vol. 56]

KATIPAYAPĀṆINISŪTRĀṆĀṀ VIŚEṢAVYĀKHYĀNAM

WRITTEN & EDITED BY

DR. K. V. SOMAYĀJULU

Lecturer

Śrī Sadāśiva Kendrīya Sanskrit Vidyāpīṭha

Puri

VARANASI

1997

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi–221 002.

First Edition, 500 Copies
Price–Rs. 10.00

Printed by—
VIJAYA PRESS,
Sarasauli, Bhojubeer
Varanasi.

लघु-ग्रन्थमाला

[५६]

कतिपयपाणिनिसूत्राणां विशेषव्याख्यानम्

प्रणेता सम्पादकश्च

डॉ० के० वि० सोमयाजुलुः

वरिष्ठ-व्याख्याता

श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठे

जगन्नाथपुर्याम्

वाराणस्याम्

२०५४ तमे वैक्रमाब्दे　　१९१९ तमे शकाब्दे　　१९९८ तमे खैस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः —
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी ।

■

प्रकाशकः —
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी—२२१ ००२.

■

प्राप्ति-स्थानम् —
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी—२२१ ००२.

■

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम् — १०=०० रूप्यकाणि

■

मुद्रकः —
विजय-प्रेस,
सरसौली, भोजूवीर
वाराणसी ।

॥ श्रीगुरुभ्यो नमः ॥

अभिप्रायाविष्करणम्

मानवानां परस्पराभिप्रायव्यक्तीकरणाय अतिमुख्यतमं साधनं भवति भाषा। भाषा यद्यपि बह्व्यस्सन्ति। तासु संस्कृतभाषा महत्त्वपूर्णा वरीवर्ति। अस्यां संस्कृतभाषायां साधुशब्दाः, अपशब्दाश्च वर्तन्ते। साधुशब्दप्रयोगे धर्मः। अपशब्दप्रयोगे चाधर्मः। असाधुशब्देभ्यो विविच्य साधुशब्दज्ञानार्थं व्याकरणमावश्यकम्। "व्याक्रियन्ते शब्दा अनेने"ति व्याकरणम्। इदञ्च व्याकरणं "ऐन्द्र-चान्द्रा"दिभेदेन यद्यप्यनेकधा व्यभाजि ; परन्तु अद्यत्वे व्याकरणमधिजिगांसमानानां छात्राणां पिपाठयिषूणाञ्च पाणिनीयव्याकरणमेवात्यन्तमुपकरोति। अस्य पाणिनीयव्याकरणस्य सूत्रकर्ता पाणिनिः। तेनाष्टाध्यायी-नामकः कश्चन ग्रन्थो व्यलेखि। अष्टाध्याय्याम् अष्टौ अध्यायाः, प्रत्यध्यायं चत्वारः पादाश्च विराजन्ते। तेन प्रायः ३,९८१ सूत्राणि, १९७० धातवः, सुप्तिङाद्यष्टविधप्रत्ययाश्च व्याकरणेऽत्र न्यरूपिषत। ततः पाणिनिसूत्राणामुपरि वार्तिककारो वररुचिर्वार्तिकान्यलिखत्। सूत्रवार्तिकयोरुपरि भगवता पतञ्जलिना महाभाष्यं प्रणीतम्। तद्ग्रन्थार्थोऽतीव गभीरः। प्रौढानामेव तद्गभीरार्थो ज्ञेयो भवति। प्रौढत्वञ्च "सकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम्"।

अत्रेदं किञ्चिद्विज्ञापनीयम्—पाणिनिसूत्राणि परमप्रामाणिकानि, वेदस्थानापन्नानि च वर्तन्ते। तेषामर्था अप्यतीव गभीराः। तादृशमहत्त्वपूर्णानां पाणिनिसूत्राणां यथार्थमज्ञात्वा दर्शनान्तरीया नैयायिकमीमांसकादयः स्वीयतत्तच्छास्त्रीयवासनया पाणिनिसूत्राणि विपरीतं व्याचख्युः। न्यायमीमांसादिशास्त्रेषु मुनित्रयोक्ता अर्था व्याकरणसम्मता एव वर्तन्ते। परन्तु तद्व्याख्यातारो गोतमजैमिनीया ये वर्तन्ते, ते स्वकपोलकल्पितरीत्या पाणिनिसूत्राणि व्याख्याय बहुधा आचिक्षिपुः। तेषां तादृशाक्षेपान् सविमर्शमस्मिन्निबन्धे तत्तत्सूत्रव्याख्यानसन्दर्भेऽहं यथामति प्रादर्शयम्। एवञ्च गोतमजैमिनीयोक्ताक्षेपाणां खण्डनपूर्वकं पाणिनिसूत्राणां यथार्थं शब्दतत्त्वं विज्ञापयितुमेवाहं "कतिपयपाणिनिसूत्राणां विशेषव्याख्यानम्" इति लघुशोधप्रबन्ध-

मसृजम् । तत्राऽपि सर्वेषां सूत्राणां व्याख्याने ग्रन्थविस्तृतभियाऽहं सूत्रचतुष्टयस्यैवं विशेषव्याख्यानमकरवम् । यद्यप्यत्र निबन्धस्थानि सूत्राणि पण्डितप्रकाण्डैर्व्याख्यातानि स्युस्तथापि मदीयशास्त्रज्ञानवर्धनाय विशिष्याऽत्र मत्कृतं प्रधानं परिश्रमं वैयाकरण-लोकं प्रति विज्ञापयितुमेव ममाऽत्र लघुशोधप्रबन्धलेखने प्रवृत्तिर्जागृतेति सर्वेषां पण्डितप्रकाण्डानां सविधे सश्रद्धं सविनयञ्च विनिवेद्य बद्धाञ्जलिर्भवामीति ।

बुधजनविधेयः
के० वि० सोमयाजुलुः
वरिष्ठव्याख्याता
पुरीस्थ-श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठस्य

मङ्गलाचरणम्

वन्देऽहं पितरौ पूज्यौ रुक्मिणीसुब्बरायकौ ।
पूज्यानस्मद्गुरून्नौमि सूर्यनारायणाभिधान् ॥

पदशास्त्रमधीत्याहं गुरुशुश्रूषया सदा ।
तत्कृपामृतभागेव प्रवर्ते शोधकर्मणि ॥

श्रीनिवासं महादेवं शङ्खचक्रगदाश्रयम् ।
श्रीवेङ्कटेशयज्वानं मातामहमहोदयम् ॥

नीलाद्रिवासिनं देवं सुभद्राग्रजसंयुतम् ।
प्रार्थये च जगन्नाथं सततं मामवत्विति ॥

श्रीरुक्मिणीसुब्बरायतनूजोऽहं यथामति ।
प्रवर्ते शोधकार्येऽत्र गुरुस्मरणपूर्वकम् ॥

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
१. कर्त्तुरीप्सिततमं कर्म	१–२०
अत्र सूत्रार्थविचारः	१–२
तमब्ग्रहणस्य प्रयोजनविचारः	२–३
कर्मलक्षणविचारसन्दर्भे भूषणसारकाराशयः	३–४
नैयायिकमतरीत्या पूर्वोक्तदोषद्वयवारणप्रदर्शनम्	४–५
नैयायिकमतखण्डनम्	५–६
कर्मसंज्ञाप्रकरणप्रत्याख्याने भर्तृहरेः कल्पनाचातुर्यम्	६
कारिकार्थविवरणम्	६–७
उक्तार्थस्य विस्तरेण प्रतिपादनम्	७
भीत्रार्थानामित्यादिसूत्राणामावश्यकता	७
सप्तसूत्रीप्रत्याख्यानप्रकारः	७–८
दार्ष्टान्तिकाशयविवरणम्, शङ्का समाधानञ्च	८–९
तृणादीनां प्रथमसूत्रेण कर्मत्वसम्पादनम्	९
अत्र कश्चन पूर्वपक्षः, तत्समाधानञ्च	९–१०
तमब्ग्रहणं प्रत्याख्येयमिति भर्तृहरिसिद्धान्तः	१०
यथैवेकमित्यादिश्लोकस्थदृष्टान्तदार्ष्टान्तपर्यालोचनम्	१०
तमब्ग्रहणप्रत्याख्याने हरिसम्मतिः, हरदत्तमतञ्च	११
भट्टोजिदीक्षित-हरिदीक्षित-भावप्रकाशकार-खण्डदेवादिमतम्	१२
नागेशभट्टमतम्	१३–१४
द्वितीया समीक्षा	१४
वारणार्थानामीप्सित इति सूत्रस्यार्थान्तरकल्पनम्	१४
अत्र वार्तिकविरोधः, भाष्यविरोधश्च	१४
हरिग्रन्थस्य युक्तत्वपूर्वपक्षः, समाधानञ्च	१५
तमब्ग्रहणस्यावश्यकत्वप्रतिपादनम्	१५–१६
ईप्सितशब्दो न रूढः, किन्तु क्रियापर इति विषयसमर्थनम्	१६
अत्रार्थे कर्मसंज्ञासूत्रस्थभाष्यप्रामाण्यप्रदर्शनम्	१६–१७
भर्तृहरावप्रामाण्यशङ्का, निवारणञ्च	१७–१९

मीमांसकमतरीत्या तथायुक्तञ्चानोप्सितमित्यादिसूत्राणां लाक्षणिकार्थबोधकत्वप्रतिपादनम् १९
न्यायसुधाकारादिमीमांसकमतखण्डनम् १९–२०

२. अष्टनो दीर्घात् २०–२४
अत्र दीर्घग्रहणज्ञापकत्वविचारः २०–२१
प्रकारत्रयेण दीर्घग्रहणस्य ज्ञापकत्वाभावप्रतिपादनं तत्खण्डनपूर्वकं ज्ञापकत्वसमर्थनञ्च २१
स्वांशे चारितार्थ्यप्रदर्शनपूर्वकं दीर्घग्रहणस्य ज्ञापकत्वसमर्थनम् २१–२२
दीर्घग्रहणस्य द्वितीय-तृतीयज्ञापकत्वाभावप्रदर्शनम्, तत्खण्डनञ्च २२–२४

३. समर्थः पदविधिः २५–३५
अत्र सूत्रार्थविचारः २५
एकार्थीभावस्वरूपम् २५–२६
व्यपेक्षावादिमतम् २६
व्यपेक्षापक्षवादिमतखण्डनद्वारा एकार्थीभावसमर्थनम् २६
प्रकृतभाष्यार्थविवरणम् २६–२७
एकार्थीभावानभ्युपगमे मीमांसकानां रथकाराधिकरण-विरोधप्रदर्शनम् २७–२८
व्यपेक्षावादिमते विशिष्टशक्त्यस्वीकारे बहुव्युत्पत्तिभङ्गप्रकारः २८–३०
चित्रगुरित्यत्र लक्षणाश्रयवतां नैयायिकानां मतवर्णनम् ३०
न्यायमतखण्डनम् ३०
विशिष्टशक्तिमनङ्गीकुर्वतां नैयायिकमीमांसकादीनां मतप्रदर्शनम् ३०–३१
नैयायिक-मीमांसकमतखण्डनम् ३१–३२
विशिष्टशक्त्यस्वीकारे मीमांसकम्मन्यानामधिकरणत्रय-विरोधप्रदर्शनम् ३२–३४
विशिष्टशक्त्यङ्गीकुर्वतां वैयाकरणानां मते निषादस्थपत्यधिकरण-विरोधपरिहारः ३४
निषादस्थपत्यधिकरणविरोधपरिहारः ३४–३५

४. न पदान्तद्विर्वचन० ३५–४०
अत्र सूत्रार्थविचारः ३५–३७
न पदान्तसूत्रस्थसवर्णस्योदाहरणप्रसङ्गः ३७–३८
शब्दरत्नकाराशयवर्णनम् ३८–४०

कतिपयपाणिनिसूत्राणां विशेषव्याख्यानम्

कर्तुरीप्सिततमं कर्म इति सूत्रार्थविचारः

'कर्तुरीप्सिततमं कर्म' इति पाणिनिसूत्रम्। कर्तुः, ईप्सिततमं, कर्मेति पदच्छेदः। अत्र सूत्र ईप्सितशब्दः क्रियापरः। कर्तुरित्यत्र कृञ्धातोः कर्त्रर्थे "ण्वुल्तृचौ" इति सूत्रेण तृचप्रत्यये, चकारस्यानुबन्धलोपे कृ+तृ इति स्थिते तृच आर्धधातुकत्वेन तस्मिन् परे कृन्धातोः ऋकारस्य "सार्वधातुकार्धधातुकयो"रिति सूत्रेण गुणे, रपरत्वे च कृते निष्पन्नकर्तृशब्दात् "क्तस्य च वर्तमाने" इति सूत्रेण षष्ठ्यां कृतायां कर्तुरिति पदं निष्पन्नम्। "आप्लृ व्याप्तौ" इत्यस्माद् धातोस्सन्नन्तात् "मतिबुद्धिपूजार्थेभ्यश्च" इति सूत्रेण कर्मणि क्तप्रत्यये, ततः "आप्ज्ञप्यृधामीत्" इति सूत्रेणाप्लृधातोराकारस्येत्वे निष्पन्नेप्सितशब्दात्तमपि ईप्सिततममिति रूपं भवति। अतिशयेनाप्तुमिच्छाभूतमिति तदर्थः। आप्तिश्चात्र सम्बन्धः। कर्तृकर्मणोस्साक्षात्सम्बन्धस्याभावात् कर्तृपदार्थविशेषणीभूतव्यापारद्वारकस्सम्बन्धोऽत्र गृह्यते। स च जन्यत्व-जन्याश्रयत्वेतदन्यतररूपः। "कारके" इत्यधिक्रियते। तथा च कारकसंज्ञा-कर्मसंज्ञयोस्समावेशः। एवञ्च कर्तुः स्वनिष्ठव्यापारप्रयोज्यफलाश्रयत्वेनेच्छाविषयीभूतः कर्मसंज्ञां लभत इति सूत्रार्थः। तथा च कर्तुस्स्वनिष्ठव्यापारप्रयोज्यफलाश्रयत्वेनेच्छाविषयत्वं कर्मत्वमिति कर्मलक्षणं फलति। "चैत्रस्तण्डुलं पचती"त्यत्र लक्षणसमन्वयः—कर्ता=चैत्रः। तन्निष्ठो यो व्यापारः=विक्लित्त्यनुकूलव्यापारः। तत्प्रयोज्यं यत् फलं=विक्लित्तिः। तदाश्रयत्वेन या इच्छेत्युक्ते तण्डुलो विक्लित्त्याश्रयो भवत्वितीच्छा। तद्विषयत्वं तण्डुले वर्तत इति तण्डुलस्य कर्मत्वम्। फलस्यापि व्यपदेशिवद्भावेन फलसम्बन्धित्वात् कर्मत्वम्। अत एव फलसमानाधिकरणेभ्यः स्तोकादिशब्देभ्यो द्वितीयायां कृतायां स्तोकं पचतीत्यादयः प्रयोगा उपपद्यन्ते।

अत्रायं प्रश्नः—"कर्तुरीप्सिततमं कर्म" इति सूत्रे कर्तुरिति विशेषणं मास्तु। सूत्रे तत्पदाभावेऽपि कारकाधिकाराद्व्यापारलाभो भविष्यतीति।

अत्रेदं समाधानम्—प्रकृतसूत्रे कर्तुरिति पदाभावे व्यापारप्रयोज्यफलाश्रयत्वं कर्मत्वमिति कर्मलक्षणं फलति। तथा सति माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्येतत्तात्पर्येण प्रयुक्ते "माषेष्वश्वं बध्नाती"ति वाक्ये माषाणामपि कर्मत्वापत्तिः। तथा हि—अत्र सूत्रे कर्तुरिति पदाभावे व्यापारप्रयोज्यफलाश्रयं कर्मेत्येवार्थः फलति। तथा च निरुक्तार्थकवाक्ये कर्मनिष्ठप्रसञ्जनक्रियायाः व्यापारपदेन ग्रहणे तज्जन्यसंयोगरूपफलाश्रयत्वं माषेषु वर्तत इति माषाणां कर्मत्वापत्तिः। कर्तुरिति पदसत्त्वे तु

कर्तृनिष्ठव्यापारप्रयोज्यफलाश्रयत्वं कर्मत्वमित्यर्थः फलति। तथा च प्रकृतोदाहरणे प्रसञ्जनक्रिया न कर्तृनिष्ठो व्यापारः, किन्तु बन्धनमेव। तज्जन्यास्वातन्त्र्यरूपफलाश्रयत्वस्याश्व एव सत्त्वेन माषेष्वभावान्नातिव्याप्तिः।

अत्र सूत्रे तमब्ग्रहणस्य प्रयोजनत्रयं वर्तते। तथा हि—प्रकृतसूत्रे तमब्ग्रहणेन व्यापारे प्राधान्यं, फले व्यापारप्रयोज्यत्वं, फलस्य प्रकृतधातुवाच्यत्वञ्चेति प्रयोजनत्रयं सिद्ध्यति। तथा च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वमिति कर्मलक्षणं फलति। चैत्रस्तण्डुलं पचतीत्यत्र लक्षणसमन्वयः—प्रकृतधातुः पच्धातुः, तदर्थो यः प्रधानीभूतो व्यापारः=फूत्कारादिव्यापारः, तत्प्रयोज्यं प्रकृतधात्वर्थक्रियाजन्यञ्च यत् फलं=विक्लित्तिः तदाश्रयत्वं तण्डुले वर्तत इति। स्पष्टञ्चेदं लघुशब्देन्दुशेखरे कारकप्रकरणे[1]।

तमब्ग्रहणस्य प्रथमप्रयोजनविचारः

"कर्तुरीप्सिततमं कर्म" इति कर्मसंज्ञासूत्रे तमब्ग्रहणात् प्रकृतकर्मलक्षणे व्यापारे प्राधान्यं निवेश्यते। तथा चात्र तमब्ग्रहणस्य 'यवेभ्यो गां वारयतो'त्यादौ यवादीनामपादानत्वं, गवादीनां कर्मत्वमिति संज्ञाद्वयस्य विषयव्यवस्थासिद्धिः फलम्। संयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारो वारयतेरर्थः। प्रधानव्यापारश्चैत्रनिष्ठः। अप्रधानव्यापारो गोनिष्ठः। प्रधानव्यापारप्रयोज्यफलं संयोगाभावः, न तु संयोगः। तादृशाभावरूपफलाश्रयत्वेन गवादेः कर्मत्वम्। अर्थादपादानसंज्ञाविधायकसूत्रे तमपः भावेन गवादिनिष्ठाप्रधानव्यापारजन्यसंयोगाश्रयत्वेन यवादीनामपि कर्मत्वापत्त्या वारयतियोगे विशेषविहितमपादानत्वं पच्यादियोगे सावकाशस्य कर्मत्वस्य बाधकं स्यात्। तथा चोभयत्राऽप्यपादानत्वापत्तिरिति संज्ञाद्वयस्य विषयव्यवस्था नोपपद्येत। अतस्सूत्रे तमब्ग्रहणमावश्यकम्।

तमब्ग्रहणस्य द्वितीयप्रयोजनविचारः

एवं कर्मसंज्ञा-सूत्रे तमपोऽभावे कर्मलक्षणे फले व्यापारप्रयोज्यत्वस्यालाभेन कर्तृनिष्ठव्यापारवाचकधातूपात्तफलाश्रयत्वं कर्मत्वमित्यर्थापत्तौ 'यवेभ्यो गां वारयतो'त्यादौ पुनर्यवादीनामपि कर्मत्वापत्तिः। तथा हि — कर्ता=चैत्रादिः, तन्निष्ठो यो व्यापारः=अभावानुकूलः, तद्वाचको धातुर्वारयतिः, तदर्थफलमभाव इव संयोगोऽपि स्यात्। अतस्तदाश्रयत्वेन पुनर्यवादीनामपि कर्मत्वापत्तिः। अतः फले व्यापारप्रयोज्यत्वनिवेशार्थं सूत्रे तमबग्रहणमावश्यकम्।

ननु कर्मलक्षणे प्रयोज्यत्वनिवेशेऽपि दोषतादवस्थ्यम्। प्रयोज्यत्वस्य जन्यजन्यसाधारणत्वादिति चेत्, सत्यम्। जन्यजन्ये प्रयोज्यत्वव्यवहारः। यथा—गमयति-

---

१. लघुशब्देन्दुशेखरे सचन्द्रकलाके, कारकप्रकरणे, पृ० ६१७।

योगे मैत्रश्चैत्रं ग्रामं गमयतीत्यादौ प्रधानप्रेरणाजन्यत्वं प्रयोज्यनिष्ठव्यापारे। तज्जन्यत्वं संयोगे। अतः प्रेरणाप्रयोज्यत्वं संयोगे सिद्ध्यतु। प्रकृते प्रधानव्यापार-प्रयोज्यत्वमभावे, तज्जन्यत्वं संयोगे नास्ति। अतस्संयोगे प्रधानव्यापारप्रयोज्यत्वा-भावान्न दोषः।

तमब्ग्रहणस्य तृतीयप्रयोजनविचारः

माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थके 'माषेष्वश्वं बध्नाती'त्यत्र कर्तृग्रहणेन कर्तृनिष्ठबन्धनरूपव्यापारजन्यफलाश्रयत्वस्याभावेन माषाणां कर्मत्ववारणेऽपि पुष्ट्यर्थं माषक्षेत्रे बध्नातीत्यर्थके 'माषेष्वश्वं बध्नाती'त्यत्र माषाणां कर्मत्वापत्तिर्दुर्वारा। कर्तृनिष्ठरज्ज्वादिसंयोगरूपव्यापारप्रयोज्यत्वस्य भक्षणे सत्त्वेन तदाश्रयत्वेन माषाणां कर्मत्वापत्तिः। अतः फले प्रकृतधात्वर्थत्व-निवेशः। प्रकृते भक्षणं न प्रकृतधात्वर्थः, किन्त्वस्वातन्त्र्यम्, अतो न दोषः।

केवलतमब्ग्रहणफलन्तु "अग्नेर्माणवकं वारयती"त्यत्र माणवकस्य कर्मत्व-सिद्धिः। तमब्ग्रहणाभावे "वारणार्थानामीप्सितः" इति सूत्रं विशेषविहितत्वेनास्याप-वादः स्यात्। तथा च माणवकशब्दाद् द्वितीया न सिद्ध्येत्। तमब्ग्रहणे त्वीप्सितमात्रे चरितार्थाया अपादानसंज्ञाया ईप्सिततमे परत्वादनेन बाधः। तथा च 'अग्ने-र्माणवकं वारयती'त्यत्र माणवकशब्दाद् द्वितीया निराबाधा।

कर्मलक्षणविचारसन्दर्भे भूषणसारकाराशयः

कर्मलक्षणविचारसन्दर्भे कौण्डभट्टस्यायमाशयः। तथा हि—कर्तृनिष्ठक्रिया-जन्यफलाश्रयत्वं कर्मत्वमिति कर्मलक्षणस्वीकारे 'चैत्रो ग्रामं गच्छती'त्यत्र ग्रामे संयोगानुकूलव्यापारजन्यसंयोगो यथा वर्तते तथा चैत्रेऽपि संयोगरूपफलसत्त्वेन चैत्रशब्दादपि द्वितीयापत्तौ 'चैत्रश्चैत्रं गच्छतीति' प्रयोगापत्तिः। एवं 'प्रयागतः काशीं गच्छती'त्यत्राऽपि प्रयागे वर्तमानश्चैत्रः प्रयागं त्यक्त्वा यदा काशीं गच्छति तदा संयोगविभागयोरप्येकक्रियाजन्यतया चैत्रनिष्ठक्रियाजन्यसंयोगाश्रयतया काश्या इव तन्निष्ठक्रियाजन्यविभागाश्रयतया प्रयागस्यापि कर्मत्वस्य सत्त्वेन द्वितीयायाः प्राप्तौ 'प्रयागं गच्छती'त्यापत्तिश्चेति चेत्, न, परया चैत्रनिष्ठ-कर्तृसंज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति 'चैत्रो ग्रामं गच्छती'त्यर्थे 'चैत्रश्चैत्रं गच्छती'ति प्रयोगापत्तिर्न भवति।

ननु कर्मसंज्ञाया अभावेऽपि वस्तुतः फलाश्रयत्वमादाय द्वितीया स्यादेवेति चेत्, न, द्वितीयोत्पत्तौ संज्ञाया नियामकत्वाच्चैत्रस्य कर्मत्वसत्त्वेऽपि तादृशसंज्ञाया अभावान्न द्वितीया। यदि विभक्त्युत्पत्तौ संज्ञाया नियामकत्वं नाङ्गीक्रियेत तर्हि

'गमयति कृष्णं गोकुलमि'त्यत्र क्रियाजन्यफलाश्रयत्वेन कृष्णपदाद् यथा द्वितीया भवति तथैव 'पाचयति कृष्णेन गोपः' इत्यत्रापि कृष्णस्य क्रियाजन्यफलशालित्वेन कृष्णपदादपि द्वितीयाप्राप्तौ 'पाचयति कृष्णं गोपः' इत्यापद्येत। संज्ञाया नियामकत्वे तु "गतिबुद्धि"सूत्रेण णिजर्थेनाऽऽप्यमानस्य यदि कर्मत्वं तर्हि गत्यादिधातुयोग एवेति नियमितत्वात् पाचयतियोगे प्रयोज्यस्य कर्मत्वाभावान्न प्रयोज्यवाचकाद् द्वितीया। किन्तु तदीयकर्तृप्रयुक्ता तृतीयैवेति 'पाचयति कृष्णेन गोपः' इति प्रयोगसिद्धौ न दोषः। ननु विभक्त्युत्पत्तौ संज्ञाया नियामकत्वाभ्युपगमेन 'चैत्रश्चैत्रं गच्छती'ति प्रयोगस्य साधुत्ववारणेऽपि तत्र चैत्रनिष्ठसंयोगजनकश्चैत्रनिष्ठो व्यापार इति शाब्दबोधो भवत्येवेति चेत्, न, समवायसम्बन्धेन धात्वर्थफलनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन जायमानशाब्दबुद्धित्वावच्छिन्नं प्रति आश्रयोपस्थितिः कारणमिति ज्ञानवतां पुरुषाणां तादृशप्रयोग इष्ट एव। अथवा प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्यकारणभावस्य सत्त्वेन चैत्रस्य व्यापाराधिकरणत्वेनानधिकरणत्वाभावेन न शाब्दबोधः। ननु प्रयागतः काशीं गच्छतीत्यत्र संयोग इव विभागस्यापि गम्लृधात्वर्थत्वात् कर्मत्वमिति चेत्, न, समभिव्याहृतधात्वर्थफलशालित्वं कर्मत्वमित्युक्तत्वेन प्रयागस्य तादृशकर्मत्वाभावेन न दोष इति।

नैयायिकमतरीत्या पूर्वोक्तदोषद्वयवारणप्रदर्शनम्

नैयायिकास्तु 'चैत्रश्चैत्रं गच्छती'ति प्रयोगवारणाय परसमवेतत्वं द्वितीयावाच्यम्, तच्च परसमवेतत्वं क्रियाया विशेषणम्। 'प्रयागतः काशीं गच्छति' इत्यत्र प्रयागस्य कर्मत्वापत्तौ प्रयागं गच्छतीत्यापत्तिवारणाय फले प्रकृतधात्वर्थतावच्छेदकत्वं निवेशनीयम्। परसमवेतत्वञ्च यस्मात् प्रातिपदिकाद् द्वितीया चिकीर्षिता तदर्थापेक्षया यः परस्तत्समवेतक्रियाजन्यधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति। चैत्रस्तण्डुलं पचतीत्यत्र लक्षणसमन्वयः — यस्मात् प्रातिपदिकाद् द्वितीया चिकीर्षिता=तण्डुलपदात्, तदर्थापेक्षया यः परः=चैत्रः, तत्समवेता या क्रिया=विक्लित्त्यनुकूला फूत्कारादिक्रिया, तत्समवेतं धात्वर्थतावच्छेदकञ्च यत्फलं=विक्लित्तिः, तदाश्रयत्वं तण्डुले वर्तत इति। तत्र परत्वं द्वितीयाप्रकृत्यर्थापेक्षया गृह्यते। अन्यथा चैत्रश्चैत्रं गच्छतीत्यापत्तिस्तदवस्थैव। कुत इति चेत् परसमवेतत्वं नाम भेदाश्रयत्वम्। तथा च 'मैत्रात् परश्चैत्रः' इत्यत्र चैत्ररूपपरसमवेता या क्रिया, तज्जन्यधात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वेन चैत्रस्य कर्मत्वापत्तिः। द्वितीयाप्रकृत्यर्थापेक्षया परत्वस्य ग्रहणे तु 'चैत्रश्चैत्रं गच्छती'त्यत्र चैत्ररूपद्वितीयाप्रकृत्यर्थापेक्षया चैत्रस्य परत्वाभावान्न तस्य कर्मत्वम्।

अत्रायं प्रश्नः — नैयायिकोक्तकर्मलक्षणे द्वितीयाप्रकृत्यर्थापेक्षया परत्वस्य ग्रहणेन 'चैत्रश्चैत्रं गच्छती'ति प्रयोगापत्तिर्न भवति। चैत्रे चैत्रभेदस्यासम्भवादित्ययुक्तम्। कुत इति चेत्–तत्र परसमवेतत्वपरिष्कारे परशब्देन भेदो गृह्यते। भेदो नामाभावः। स चाभाव उभयाभावो वा विशिष्टाभावो वाऽत्र ग्राह्यः। तथा च चैत्रे चैत्र घट उभयं नास्तीत्याकारकप्रतीतिसिद्ध उभयाभावो वा नो चेद् आकाशत्वावच्छिन्नश्चैत्रो नास्तीत्याकारकविशिष्टाभावो वा समायाति। तथा सति 'चैत्रश्चैत्रं गच्छती'त्यत्र चैत्रे उभयाभावस्य वा विशिष्टाभावस्य वा ग्रहणेन चैत्रे चैत्रभेदस्य सत्त्वात् तत्समवेतक्रियाजन्यधात्वर्थतावच्छेदकफलाश्रयत्वेन चैत्रस्य कर्मत्वाऽऽपत्तौ 'चैत्रश्चैत्रं गच्छती'त्यापत्तिः पुनस्तदवस्थैवेति।

अत्रेदं समाधानम्— परसमवेतत्वपरिष्कारे परशब्देन भेदस्य ग्रहणेऽप्यत्रोभयाभावो वा विशिष्टाभावो वा नैव ग्राह्यः, पूर्वोक्तदोषापत्तेः; किन्तु तद्व्यक्तित्वावच्छिन्नप्रतियोगितानिरूपकोऽत्यन्ताभावोऽत्र ग्राह्यः। तद्व्यक्तित्वावच्छिन्नप्रतियोगितानिरूपकात्यन्ताभावो नाम तद्व्यक्तिनिष्ठाधेयतासम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितानिरूपकोऽत्यन्ताभावः। तथा च 'चैत्रश्चैत्रं गच्छती'त्यत्र चैत्रे उभयाभावस्य, विशिष्टाभावस्य वा सम्भवेऽपि चैत्रत्वावच्छिन्नचैत्रत्वेतरधर्मानवच्छिन्नचैत्रनिष्ठप्रतियोगितानिरूपकात्यन्ताभावस्यासम्भवान्न 'चैत्रश्चैत्रं गच्छती'त्यापत्तिः। तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावे प्रतियोगिवैयधिकरण्यं निवेशनीयम्। अन्यथा तत्र प्रतियोगिसमानाधिकरणाभावस्य प्राप्त्या "अग्रे वृक्षः कपिसंयोगी मूले न" इत्यत्रैकस्मिन्नेव वृक्षाधिकरणे अग्रावच्छेदेन कपिसंयोगस्य सत्त्वेऽपि मूलावच्छेदेन तदभावात्तत्रातिव्याप्तेः। अतोऽभावे प्रतियोगिवैयधिकरण्यं निवेशनीयम्। फलस्य प्रकृतधात्वर्थतावच्छेदकस्य ग्रहणात् 'प्रयागात् काशीं गच्छती'त्यत्र विभागस्य प्रकृतधात्वर्थाभावात् प्रयागं गच्छतीत्यापत्तिरपि न भवति। अतो न दोष इति वदन्ति।

नैयायिकमतखण्डनम्

तन्न युक्तम्। 'चैत्रश्चैत्रं गच्छती'त्यत्र द्वितीयावारणार्थं परसमवेतत्वाङ्गीकारे नैयायिकानामतिरिक्तपरसमवेतत्वरूपकल्पनाप्रयुक्तं गौरवमापद्येत। किञ्चातिप्रसङ्गो द्वितीयाया उत शाब्दबोधस्य वेति सन्देहः। परसमवेतत्वस्य द्वितीयावाच्यत्वेऽपि 'पाचयति कृष्णेन गोपः' इत्यत्र प्रयोज्यस्य कर्मत्वेन द्वितीयापत्तिस्तदवस्थैव। 'तण्डुलं पचति चैत्रः' इत्यत्र तण्डुलपदाद्यथा द्वितीया भवति तथा 'तण्डुलः पच्यते स्वयमेव' इत्यत्रापि प्रथमान्तार्थस्य तण्डुलस्यापि त्वदुक्तकर्मत्वापत्तौ 'तण्डुलं पच्यते' इत्यापत्तिः। एवं 'गमयति कृष्णं गोकुलमि'त्यत्र कृष्णपदाद्यथा

द्वितीया प्राप्नोति तथा 'पाचयति कृष्णेन गोपः' इत्यत्रापि प्रयोज्ये कृष्णे स्वभिन्न-प्रयोजकसमवेतक्रियाजन्यणिजन्तधात्वर्थतावच्छेदकोभूतप्रकृत्यर्थक्रियात्मकफलशालित्व-रूपकर्मत्वस्य सत्त्वेन द्वितीयाप्राप्तौ 'पाचयति कृष्णं गोपः' इत्यापत्तिश्च। शाब्दबोधातिप्रसङ्गस्त्विष्टापत्त्या यद्वा प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यक-शाब्दबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिः कारणमिति कार्यकारण-भावस्वीकारेण वा निरस्तः। किञ्च प्रकृत्यर्थप्रकारकबोधे द्वितीयार्थपरसमवेत-त्वोपस्थितिः कारणम्, परसमवेतत्वप्रकारकबोधे विशेष्यतया धातुजन्योपस्थितिः कारणमित्यादिकार्यकारणभावस्वीकारेऽत्यन्तं गौरवम्। किञ्च 'घटं जानाति' इत्यत्र नैयायिकोक्तकर्मत्वाभावेन द्वितीयानापत्तिः। अतो वैयाकरणमतमेव युक्तम्। स्पष्टञ्चेदं वैयाकरणभूषणसारे[1]।

कर्मसंज्ञाप्रकरणप्रत्याख्याने भर्तृहरेः कल्पनाचातुर्यम्

महानुभावो भर्तृहरिस्साधनसमुद्देशे कर्मप्रकरणे विचित्रां कल्पनां प्रादर्शयत्। यथा—"कर्तुरीप्सिततमं कर्म", "तथायुक्तञ्चानीप्सितम्", "अकथितञ्च" इत्यादि-सूत्राणि सम्यग्व्याख्यायानन्तरम्—

"यथैवैकमपादानं शास्त्रे भेदेन दर्शितम्।
तथैकमेव कर्माऽपि शास्त्रे भेदेन दर्शितम्[2] ॥

इति कारिकया स्वसिद्धान्तमुद्घाटयामास।

कारिकार्थविवरणम्

शास्त्रे=पाणिनीये, एकमेव=एकसूत्रसिद्धमेव नाम "ध्रुवमपायेऽपादानम्" इति सूत्रसिद्धमेव, अपादानम्=अपादानसंज्ञा, यथा=येन प्रकारेण, भेदेन=अनेकधा="भीत्रार्थानां भयहेतुरि"त्यादिसप्तभिस्सूत्रैः[3], "ल्यब्लोपे कर्मणो"त्यादि-वार्तिकद्वयेन च दर्शितम्=स्पष्टप्रतिपत्तये कण्ठत उक्तम्, तथा=तद्वत्, कर्मापि=कर्मसंज्ञापि, एकमेव=एकसूत्रसिद्धमेव नाम "कर्तुरीप्सिततमं कर्म" इति सूत्र-सिद्धमेव, शास्त्रे=पाणिनीये, भेदेन=अनेकधा=अनेकसूत्रैः, दर्शितम्=स्पष्ट-प्रतिपत्तये कण्ठत उक्तमिति।

---

१. वैयाकरणभूषणसारे, तत्त्वदर्शिनीटीकासहिते, सुबर्थ-निर्णये।

२. वाक्यपदीये, तृतीयकाण्डे, अम्बाकर्त्रीसहिते, सप्तमे साधनसमुद्देशे, पृ० २२३, श्लोकसंख्या–७८।

३. वैयाकरणसिद्धान्तकौमुद्याम्, बालमनोरमा-सहितायाम्, कारकप्रकरणे, पृ० ४४६-४५०।

भाष्यकारेण "ध्रुवमपायेऽपादान"मिति प्रथमसूत्रेणैव सर्वत्रापादानत्वं संसाध्य "भीत्रार्थानां भयहेतुः" इत्यादिसूत्राणि प्रत्याख्यातानि । भाट्टरहस्येऽप्ययं प्रत्याख्यानप्रकारो विस्तरेण खण्डदेवेन न्यरूपि —"वस्तुतस्तु बहुधेतानि सर्वाणि भाष्यकारेण प्रत्याख्यातानि..... ....."इत्याद्युक्त्वा अन्ते "ततश्च तत्सूत्रेणेवापादानत्वसिद्धया-सूत्रान्तरवैयर्थ्य"मिति तत्रत्यो ग्रन्थः[१] । तं भाष्यार्थं दृष्टान्तीकृत्य भर्तृहरिणा कर्माधिकारे कर्मसंज्ञाप्रकरणे "कर्तुरीप्सिततमं कर्म" इति प्रथमसूत्रेणैव कर्मत्वं संसाध्य "तथायुक्तञ्चानीप्सित"मित्यादीनि कर्मसंज्ञाविधायकसूत्राणि प्रत्याख्यातानि । एषैव भर्तृहरेर्नूतनकल्पना । एनमेवार्थमहमधुना विस्तरेण यथामति प्रदर्शयामि ।

उक्तार्थस्य विस्तरेण प्रतिपादनम्

प्रथमाध्याये चतुर्थपादे कारकाधिकारे "ध्रुवमपायेऽपादान"मित्यपादानसंज्ञा-विधायकं सूत्रम् । अपायो विश्लेषः । तत्र ध्रुवम्=निश्चलमवधिभूतं कारकं अपादानं स्यादिति तदर्थः । तथा च विभागाश्रयत्वे सति तद्विभागजनकतत्क्रियानाश्रयत्वमपादानत्वमिति निष्कृष्टार्थः । 'वृक्षात् पर्णं पतती'त्युदाहरणम् । अत्र पतनक्रियया वृक्षपर्णयोर्विभागो जातः । तत्क्रियानाश्रयत्वेन वृक्षस्यापादानत्वम्, तत्क्रियाश्रयत्वेन पर्णस्य कर्तृत्वञ्च सिद्धयति ।

भीत्रार्थानामित्यादिसूत्राणामावश्यकता

अनन्तरं "भीत्रार्थानां भयहेतुरि"त्यादिसप्तभिः सूत्रैरपादानसंज्ञा विहिता पाणिनिना । 'चोरादिबभेति', 'अध्ययनात् पराजयते' इत्यादीन्युदाहरणानि । एषु वृक्षपर्णयोरिव चोरस्य, बिभ्यतश्च वास्तवौ संयोगविभागौ न स्तः । अतः प्रथमसूत्रेण चोरादेरपादानत्वं न प्राप्नोतीत्याशयेन तत्सिद्धये सप्त सूत्राण्यारब्धानि । तथा "जुगुप्साविरामप्रमादार्थानामुपसंख्यानमि"ति, "यतश्चाध्वकालनिमानं, ततः पञ्चमी, तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात् सप्तमी च वक्तव्या" इति वचनद्वयं कात्यायनेन आरब्धम् ।

सप्तसूत्रीप्रत्याख्यानप्रकारः

ततः पतञ्जलिना भीत्रार्थानां भयहेतुरित्यादिसूत्रसप्तकं,वार्तिकद्वयञ्च प्रत्याख्यातम् । तथा हि—"भीत्रार्थानां भयहेतुः" (पा० सू० १।४।२५) । अयं योगश्शक्योऽवक्तुम् । कथं 'वृकेभ्यो बिभेति', 'दस्युभ्यो बिभेति', 'चोरेभ्यस्त्रायते', 'दस्युभ्यस्त्रायते' इति ? इह तावत् 'वृकेभ्यो बिभेति', 'दस्युभ्यो बिभेति'—य एष मनुष्यः प्रेक्षापूर्वकारो भवति, स पश्यति यदि मां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति स बुद्धया

---

१. भाट्टरहस्ये, खण्डदेवभावप्रकाशसहिते, द्वितीयभागे पञ्चम्यर्थनिरूपणे, पृ० २११ ।

सम्प्राप्य निवर्तते। तत्र "ध्रुवमपायेऽपादानम्" इत्येव सिद्धम्। इह 'चोरेभ्यस्त्रायते, दस्युभ्यस्त्रायते' इति। य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद्भवति, स पश्यति यदीमं चोराः पश्यन्ति ध्रुवमस्य वधबन्धनादिपरिक्लेशा इति स बुद्ध्या सम्प्राप्य निवर्तयति। तत्र "ध्रुवमपायेऽपादान"मित्येव सिद्धमिति "भीत्रार्थानां भयहेतुरि"ति सूत्रे भाष्य[1] उक्तम्। बाह्यरूपेण वास्तवसंयोगविभागावेव नापादानत्वप्रयोजकौ; किन्तु बुद्धिपरिकल्पितावपि। गृहे स्थितोऽपि चैत्रादिरेवं चिन्तयति "यद्यहं तत्र गमिष्याम्यवश्यं चोरा मां हन्यु"रिति। अतो नाहं तत्र गच्छामीत्यालोचयति। गृहे दस्यूनामभावेऽपि बुद्धिसन्निधापितस्य चोरस्य सत्त्वात्तत्र चोरादेर्दस्यूनाञ्च संयोगविभागौ जातावेव। तत्र निवृत्तिपर्यन्तं धात्वर्थः। 'चोरात् त्रायते' इत्यत्र निवर्तनापर्यन्तं धात्वर्थः। अतः प्रथमसूत्रेणैव वृकादीनामपादानत्वस्य सिद्धत्वादिदं सूत्रं नारम्भणीयम्। एवमेव "पराजेरसोढः", "वारणार्थानामीप्सितः" इत्यादीनि सूत्राण्यपि नारम्भणीयानीति विचारोऽयं भाष्ये वरीवर्ति। स्पष्टं चेदं लघुशब्देन्दुशेखरे कारकप्रकरणे—"एषां धातूनां स्वार्थपूर्वकबौद्धविश्लेषजनकनिवृत्तिलक्षणया सूत्रेणैव सिद्धेचेदं वार्तिकमुत्तरसूत्राणि च प्रत्याख्येयानी"ति तत्रत्यो ग्रन्थः[2]। [3]वैयाकरणसिद्धान्तलघुमञ्जूषायां सुबर्थविचारेऽपि नागेशभट्टेन—"विभागश्च न वास्तवसम्बन्धपूर्वक एव, किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वकोऽपि। अत एव जुगुप्सापूर्वकनिवृत्तिलक्षकतामाश्रित्य जुगुप्साविरामेत्यादिप्रत्याख्यानं भाष्योक्तं सङ्गच्छते" इत्युक्तम्।

भर्तृहरिरपादानप्रकरणस्थं भाष्यार्थमवष्टभ्य तद्भाष्यार्थं "यथैवैकमपादानं शास्त्रे भेदेन दर्शितम्" इति दृष्टान्ततया प्रदर्श्य तमर्थं "तथैकमेव कर्मापि शास्त्रे भेदेन दर्शितमि"ति दार्ष्टान्तिकमतिदिदेश।

दार्ष्टान्तिकाशयविवरणम्

"कर्तुरीप्सिततमं कर्म" (पा०सू० १।४।४९) इति प्रथमं कर्मसंज्ञाविधायकं सूत्रम्। कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति तदर्थः। 'चैत्रस्तण्डुलं पचति' इत्युदाहरणम्। अत्र चैत्रनिष्ठव्यापारजन्यविक्लित्तिरूपफलाश्रयत्वेन तण्डुलस्य कर्मसंज्ञायां ततः "कर्मणि द्वितीया" इति सूत्रेण द्वितीया।

---

१. 'पातञ्जल-महाभाष्ये' प्रदीपोद्द्योतसहिते प्रथमाध्याये चतुर्थपादे—तृतीयाह्निके, २५ सूत्रे, पृ० ३६०-३६१।

२. लघुशब्देन्दुशेखरे, सचन्द्रकलाके, कारकप्रकरणे, पृ० ६८९।

३. वैयाकरणसिद्धान्तलघुमञ्जूषायाम्, काशिका-टीका-सहितायाम्, सुबर्थविचारे, पृ० २२३।

एवं 'विषं भुङ्क्ते' चोरान् पश्यति, गां दोग्धि पयः, क्रूरमभिक्रुध्यति, ग्रामं गच्छन् तृणं स्पृशति, इत्यादौ विषादिषु प्रकर्षाभावेन निरुक्तकर्मत्वस्याप्राप्त्या "तथायुक्तञ्चानीप्सित"मित्यादीनि सूत्राणि[1] पाणिनिना आरब्धानि।

अत्र काचन शङ्का

"कर्तुरीप्सिततमं कर्म" इति कर्मसंज्ञा-सूत्रे तमपो ग्रहणेन तत्सामर्थ्यलब्ध-स्यार्थस्य विषादावभावात् कथमेकेन सूत्रेण सर्वत्र संज्ञासिद्धिरिति।

अत्रेदं समाधानम्

प्रथमसूत्र एकस्य तमपः परित्यागेन "तथायुक्तञ्चानीप्सित"मित्यादिसूत्रो-दाहरणेष्वपि "कर्तुरीप्सिततमं कर्म" (पा० सू० १।४।४९) इति सूत्रेणैव सर्वत्र कर्मत्वं सिद्ध्यति। सर्वत्र कर्तुः क्रिययाऽऽप्यमानस्य समत्वादिति।

तृणादीनां प्रथमसूत्रेण कर्मत्वसम्पादनम्

यत्तु तमब्ग्रहणस्योदाहरणं 'दध्ना भुञ्जीय' इति, तत्र समकक्ष्यतया दध्योदनयोरीप्सितत्वे तमब्ग्रहणमकिञ्चित्करम्। तमपोऽभावेन श्रमापनोदनार्थं ग्रामगमनेऽप्यन्तरा वृक्षमूलोपसर्पणमभिसंहृतमिति प्रकृतोदाहरण ईप्सितमात्रस्य कर्मसंज्ञा पूर्वसूत्रेणैव सिद्ध्यति।

अत्र कश्चन पूर्वपक्षः

'यवेभ्यो गां वारयती'त्यादौ यवादेरपादानत्वमेव। गवादेः कर्मत्वमेवेति कर्मत्वापादानत्वयोर्विषयविभागप्रदर्शनार्थं कर्मसंज्ञा-सूत्रे तमब्ग्रहणमावश्यकम्। अन्यथा पच्यादौ चरितार्थस्य कर्मत्वस्य विशेषविहितेन "वारणार्थानामीप्सितः" (पा० सू० १।४।२७) इत्यपादानत्वेन बाधापत्त्या गवादेरपि पञ्चम्यापत्तिरिति।

समाधानम्

"वारणार्थानामीप्सितः" इति सूत्रस्य वारणार्थानां धातूनां योग ईप्सितोऽर्थोऽ-पादानमिति नार्थः। किन्तु वारणमर्थ्यन्त इति वारणार्थाः। वारयितव्याः प्रतिषेद्धव्या इति यावत्। वारणार्थानां=प्रतिषेद्धव्यानां गवादीनामीप्सिता यवादय एवेति तेषामेवापादानत्वम्, गवादीनां कर्मत्वमेवेति तमब्ग्रहणाभावेऽपि तयोर्विषयविभागस्सिद्धः।

---

१. वैयाकरणसिद्धान्तकौमुद्याम्, बालमनोरमा-सहितायाम्, कारकप्रकरणे, पृ० ४११।

एवञ्च प्रयोजनाभावात् कर्मसंज्ञा-सूत्रे तमपो ग्रहणं न कार्यम्। अतः "तथा-युक्तञ्चानीप्सितम्" (१।४।५०) इत्यादिसूत्रोदाहरणेष्वपि सर्वत्र कर्मत्वस्य सिद्धत्वात् "तथायुक्तञ्चानीप्सित"मित्यादि सप्त सूत्राणि प्रत्याख्येयान्येवेति कारिकार्थः।

तमब्ग्रहणं प्रत्याख्येयमिति भर्तृहरिसिद्धान्तः

एनं सन्दर्भमाश्रित्यान्योऽपि विषयो हरिग्रन्थादवगम्यते यत् कर्मसंज्ञा-सूत्रे तमपोऽभावेन कर्मत्वस्य, "स्पृहेरीप्सितः" (१।४।३६) इति सूत्रविहितसम्प्रदानत्वस्य चोभयोरपीप्सितविषयत्वाविशेषात् स्पृहयतियोग उभयोः प्राप्तौ पचत्यादौ चरिता-र्थस्य कर्मत्वस्य स्पृहयतियोगे विशेषविहितेन सम्प्रदानत्वेन बाधः। एवं शेषषष्ठ्या अप्यनेन सम्प्रदानत्वेन बाधः। अतः स्पृहयतियोगे 'पुष्पेभ्यस्स्पृहयतो'ति सम्प्रदानत्व-मूलिका चतुर्थीविभक्तिरेव साध्वी। कर्मत्वशेषत्वयोर्बाधितत्वान्न द्वितीया-षष्ठ्यौ। एष चार्थस्सम्प्रदानसंज्ञाधिकारे—

"हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकम्।
ऋच्यर्थादिषु शास्त्रेण सम्प्रदानाख्यमुच्यते"॥

इति [1]कारिकया हरिणा प्रादर्शि। विवृतश्चायमर्थस्तत्रैव हेलाराजेन।

यथैवैकमित्यादिश्लोकस्थदृष्टान्तदार्ष्टान्तपर्यालोचनम्

भाष्यकृताऽपादानप्रकरणे "ध्रुवमपायेऽपादान"मिति प्रथमसूत्रेणापादानत्वं संसाध्य "भीत्रार्थानां भयहेतुः" (पा० सू० १।४।२५) इत्यादिसूत्राणि प्रत्याख्यातानि। एतच्चांशतो निरूपितमेव। कर्मसंज्ञाप्रकरणे प्रथमसूत्रे तमब्ग्रहणं परित्यज्य तत्सूत्रेणैव सर्वत्र कर्मत्वं संसाध्य "तथायुक्तञ्चानीप्सितमित्यादिसूत्राणि भाष्यकृता न प्रत्याख्यातानि। नाऽपि तदर्थस्सूचितः। परन्तु न्यायसाम्याद्भर्तृहरिणैष नवीनः पन्थाः प्रादर्शि। तत्र स्वोप-दर्शिते मार्गे पाठकानामश्रद्धेयत्वनिराकरणाय यथैवैकमित्यादिकारिका-पूर्वार्धेना-पादानप्रकरणस्थभाष्यार्थो दृष्टान्ततया न्यरूपि। तमपोऽभावेऽपि न कापि क्षतिरित्यपि निगूढाभिप्रायो भर्तृहरेः। तमेवाशयं विस्तरेण प्रादर्शयद्धेलाराजः। "एवं कर्मापीप्सित-तममेकमेव, कर्तुः क्रियया आप्यमानस्य सर्वत्र भावात्। मन्दबुद्ध्यनुग्रहायोत्तरसूत्र-प्रपञ्च इति कारिकार्थः" इति तत्रत्यो हेलाराजग्रन्थः[2]। अनेनैवाशयेन सम्प्रदाना-धिकारे "हेतुत्वे कर्मसंज्ञायाम्" इत्यादिकारिकया सम्प्रदानत्वस्य कर्मत्वशेषत्वबाधकत्वं प्रत्यपाद्यत।

---

१. वाक्यपदीये तृतीयकाण्डे, अम्बाकर्त्रीसहिते, साधनसमुद्देशे सम्प्रदानाधिकारे, पृ० ११७, १३०।

२. तत्रैव, प्रकीर्णप्रकाशे—पृ० २२४।

तमब्ग्रहणप्रत्याख्याने हरिसम्मतिः

अत्र कश्चन प्रश्नः—तमब्ग्रहणप्रत्याख्यानं हरेस्सम्मतं न वेति विचारः। "यथैवेकमपादानमि"त्यादिकारिकया तमब्ग्रहणं प्रत्याख्येयमित्यर्थो न लभ्यते। केवलमेकसूत्रेण सिद्धे "तथायुक्तञ्चानीप्सितमि"त्यादिसूत्रान्तराणां प्रयोजनं स्पष्टप्रतिपत्त्यर्थमित्येवोक्तं कारिकया।

समाधानम्

विना तमब्ग्रहणप्रत्याख्यानं प्रथमसूत्रेण सर्वत्रानिर्वाहात्तत्प्रत्याख्यानमपि कारिकया गर्भीकृतमेव।

समीक्षा

महानुभावेन शब्दब्रह्मविदा गुरुणा भर्तृहरिणा निरुक्तदिशा नूतनपन्था अन्वसारि। परन्त्वनन्तरकालिकाश्शास्त्रव्याख्यातारो भर्तृहरेर्नूतनपथं नानुमन्वते। तथा हि—

हरदत्तमतम्

"स्पृहेरीप्सितः" (१।४।३६) इति सूत्रे काशिकावृत्तेर्व्याख्याने पदमञ्जरीग्रन्थे[1] हरदत्तमिश्रेणैवमुक्तम्—"ईप्सितमात्र इयं संज्ञा, प्रकर्षविवक्षायां परत्वात् कर्मसंज्ञैव भवति। पुष्पाणि स्पृहयति। यदा त्वीप्सितमीप्सिततमं वा शेषत्वेन विवक्ष्यते तदा षष्ठी भवती"ति।

हरदत्ताशयविवरणम्

कर्मसंज्ञा-सूत्रे तमपस्सत्त्वेन धातुवाच्यफलाश्रयस्यैव कर्मत्वम्। सम्प्रदानसंज्ञाविधायकसूत्रे तमपोऽभावेन फलस्य धातुवाच्यत्वे नाग्रहः। एवञ्च स्पृहयतेरिच्छामात्रवाचित्वे फलस्य धात्ववाच्यत्वेन तत्र कर्मत्वाप्राप्त्या सम्प्रदानत्वाच्चतुर्थी। स्पृहयतेरिच्छानुकूलव्यापारमात्रवाचित्वे त्विच्छारूपधात्वर्थफलाश्रयत्वेन सम्प्रदानत्वबाधनेन परत्वात् कर्मसंज्ञा। ईप्सितेप्सिततमयोरुभयोरपि शेषत्वेन विवक्षायां षष्ठ्येव। तथा चेप्सितमात्रे = धात्ववाच्यफलाश्रयत्व इयं सम्प्रदानसंज्ञा। प्रकर्षविवक्षायान्तु = फलस्य धातुवाच्यत्वविवक्षायान्त्वीप्सिततमस्यापीप्सितत्वेन सम्प्रदानत्वकर्मत्वयोरुभयोरपि प्राप्तौ परत्वात् कर्मसंज्ञैवेति हरदत्तग्रन्थार्थः। तस्मिन् ग्रन्थे तमब्ग्रहणाग्रहणमूलिका विषयव्यवस्था प्रादर्शि। अनेन तमब्ग्रहणप्रत्याख्यानरीतिर्हरदत्तेन नाभ्युपेयत इति स्पष्टमवगम्यते। भर्तृहरौ नामनिर्देशनपूर्वकं दोषोद्भावनमयुक्तमिति मन्वानो हरदत्तस्स्वीयविषयप्रदर्शनमात्रेण तत्राविश्वासं व्यञ्जयति।

---

१. पदमञ्जर्याम् पृ० ५५३।

भट्टोजिदीक्षितमतम्

श्रीमान् भट्टोजिदीक्षितोऽपि "स्पृहेरीप्सितः" (पा० सू० १।४।३६) इति सूत्रे [१]प्रौढमनोरमायां कर्मत्वसम्प्रदानत्वशेषत्वानां बाध्यबाधकभावोऽस्तीति हरि-हेलाराजयोराशयञ्च विविच्य पार्थक्येन प्रादर्शयत् । तत्र हरिहेलाराजयोस्स्विति-तु-शब्देन तन्मतेऽरुचिर्दर्शिता । तद्यथा—"स्पृहेरीप्सितः" इति सूत्रव्याख्यान-सन्दर्भे 'परत्वादि'ति कौमुदीप्रतीकमादाय तेन 'परस्परेण स्पृहणीयशोभम्, स्पृहणीयगुणैर्महात्मभि'रित्यादिसिद्धम् । एतत्सर्वं हरदत्तादिरीत्योक्तम् । वाक्य-पदीयहेलाराजग्रन्थयोस्तु स्पृहयतियोगे कर्मसंज्ञायाश्शेषषष्ठ्याश्च बाधिकेयं सम्प्रदान-संज्ञेति स्थितम् । तन्मते स्पृहणीयमित्यत्र 'दानीयः' इतिवत् सम्प्रदाने कृत्यः । 'कुमार्य इवे'त्यत्र तु विभक्तिविपरिणामेन कान्ताय स्पृहयन्तीति व्याख्येयमिति दीक्षितेनाऽभाणि ।

हरिदीक्षितमतम्

प्रौढमनोरमा-व्याख्याने शब्दरत्नेऽपि[२] कर्मत्वादीनां बाध्यबाधकभावाभावमेव स्पष्टीचकार हरदत्तः । "षष्ठ्यपवादत्वाच्छेषत्वविवक्षा कर्तुमशक्येत्यभिमान" इति तत्रत्यो ग्रन्थः ।

भावप्रकाशकारमतम्

शब्दरत्नव्याख्याता वैद्यनाथोऽपि स्वीयभावप्रकाशे[३] कर्मत्वसम्प्रदानत्व-शेषत्वानां बाध्यबाधकभावाभावमेव स्पष्टं प्रत्यपीपदत् ।

खण्डदेवमतम्

[४]भाट्टरहस्ये श्रीमान् खण्डदेवोऽपि पूर्वोक्तमतद्वयं प्रदर्श्य भर्तृहरिमतस्याना-देयत्वं स्पष्टीचकार । "तेन निरवकाशत्वात् सम्प्रदानसंज्ञा कर्मसंज्ञा-शेषषष्ठ्योर्बाधि-केति वाक्यपदीयप्रभृतयः । वस्तुतस्त्वीप्सितग्रहणादीप्सिततमत्वप्रयुक्तकर्मसंज्ञाया-स्सम्बन्धसामान्यप्रयुक्तशेषषष्ठ्या वा बाधे प्रमाणाभावः ..."इत्याद्युक्त्वा अन्ते कर्मत्वविवक्षायां पुष्पस्य स्पृहयतीति स्पष्टमुक्तं महानुभावेन खण्डदेवेन ।

---

१. प्रौढमनोरमा-ग्रन्थे, लघुशब्दरत्न-भैरवीभावप्रकाशसरलाख्यव्याख्यानचतुष्टयसहिते, कारक-प्रकरणे, पृ० ९-१० ।

२. प्रौढमनोरमा-व्याख्याने, शब्दरत्ने, कारकप्रकरणे, पृ० ९-१० ।

३. भावप्रकाशे, लघुशब्दरत्नव्याख्याने, कारकप्रकरणे, पृ० ९-१० ।

४. भाट्टरहस्ये, मूलग्रन्थे द्वितीयभागे चतुर्थ्यर्थविचारे, पृ० २५५,-२५६ ।

नागेशभट्टमतम्

वैयाकरणनागेशोऽपि वैयाकरणसिद्धान्तलघुमञ्जूषायां सुबर्थविचारे[1], लघुशब्देन्दुशेखरे कारकप्रकरणे[2] च कर्मत्वसम्प्रदानत्वशेषत्वानां बाध्यबाधकभावाभावमेव न्यरूपयत् ।

एवं पर्यालोचने भर्तृहरिप्रदर्शिते नूतनपथेऽनन्तरकालिका व्याख्यातारो वैमत्यमेव प्रदर्शयन्निति स्पष्टमवगम्यते । 'पुष्पेभ्यः स्पृहयती'त्यत्र स्पृहयतियोगे विभक्तित्रयमपि साध्वेव । अत एव स्पृहयतियोगे विभक्तित्रयमपि दरोदृश्यते महाकविप्रयोगेषु । तद्यथा—

"स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समस्समुन्नतेः"[3] ॥

"परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजनिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत्"[4] ॥

"परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजनिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्"[5] ॥

"[6]स्त्रीषु प्रवीरजननी जननी तवैव देवी स्वयं भगवती गिरिजाऽपि यस्यै ।
त्वद्दोर्वशीकृतविशाखमुखावलोकव्रीडाविदीर्णहृदया स्पृहयाम्बभूव" ॥

अत एव 'स्पृहयन्ति गुणान् मनीषिणः परिवादन्तु परस्य दुर्जनः' इति, 'कुमार्य एव कान्तस्य त्रस्यन्ति स्पृहयन्ति च' इति प्रयोग उपपद्यत इति स्पष्टमाह गोकुलनाथः [7]पदवाक्यरत्नाकरे । भर्तृहरिमतेऽप्येते प्रयोगा अगत्या साध्या भवेयुरेव ।

---

१. वैयाकरणसिद्धान्तलघुमञ्जूषा-ग्रन्थे, कला-टीका-सहिते, सुबर्थविचारे, पृ० १२७३ ।

२ लघुशब्देन्दुशेखरग्रन्थे—सचन्द्रकलाके, कारकप्रकरणे, पृ० ६७५ ।

३. किरातार्जुनीये—२।४३, पृ० ४३ ।

४. "कालिदासग्रन्थावली" नामकग्रन्थे—रघुवंशे—७।१४, पृ० १५१ ।

५. तत्रैव, कुमारसम्भवे—७।६६, पृ० ८९ ।

६. अनर्घराघवे—४।३३, पृ० २२४ ।

७. पदवाक्यरत्नाकरे—सप्तदशप्रकरणे, पृ० ७१३ ।

एवञ्च कर्मसंज्ञा-सूत्र ईप्सिततमत्वं प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्य-प्रकृतधात्वर्थफलाश्रयत्वेनेच्छाविषयत्वम्, तमपस्सत्त्वात् । अपादानसंज्ञा-विधायक-सूत्रे तु धात्वर्थव्यापारप्रयोज्यधात्वर्थफलाश्रयत्वमीप्सितत्वम् । व्यापारे प्रधानेति विशेषणं न दीयते, तमपोऽभावादिति विवेकः।

द्वितीया समीक्षा

निरुक्तदिशा कर्मत्वसम्प्रदानत्वशेषत्वानां बाध्यबाधकभावं स्वीकुर्वतां मत-मेकम् । तदस्वीकुर्वतां मतं द्वितीयम् । द्वितीयमतमवलम्बमाना हरदत्तादयः प्रथममते वैमत्यं प्रादर्शयन् । तच्चायुक्तम् । तन्मते कर्मसंज्ञा-सूत्रे तमपोऽभावेन तन्मते बाध्य-बाधकभावस्य सुघटत्वात् । एवञ्च कथं वा तन्मतनिराकरणं सङ्गच्छते नव्यव्याख्या-तृणामिति तेषु कश्चनायमाक्षेपोऽवशिष्यते ।

वारणार्थानामीप्सित इति सूत्रस्यार्थान्तरकल्पनम्

कर्मसंज्ञाविधायकसूत्रे तमपोऽभावे 'यवेभ्यो गां वारयती'त्यादौ कर्मत्वसम्प्रदा-नत्वयोर्विषयव्यवस्था दुरुपपादा स्यात् । तत्सत्त्वे त्वीप्सितेऽपादानत्वमीप्सिततमे कर्मत्व-मिति तद्व्यवस्था सिद्ध्यति । न च वारणार्थानां=वारयितव्यानां=प्रतिषेद्धव्याना-मीप्सितोऽर्थोऽपादानं स्यादिति सूत्रार्थस्वीकारेण न दोष इति वाच्यम्, तस्यार्थस्य भाष्यानुक्तत्वेनाऽप्रामाणिकत्वात् ।

अत्रैव वार्तिकविरोधः

किञ्च "वारणार्थानामीप्सितः" इति सूत्रे 'अग्नेर्माणवकं वारयती'त्यत्र माणवके अपादानत्वमाशङ्क्य कर्मणो यदीप्सितं तदपादानमित्यर्थकेन कर्मणा यदीप्सितमिति वचनेन वार्तिककृता परिहृतम् । पूर्वोक्तार्थस्वीकारे तु सूत्रेणैव तद्वारणसम्भवाद्वार्तिककारस्य वचनान्तरानुधावनं निष्फलमेव स्यात् ।

अत्र भाष्यविरोधः

किञ्च माणवकेऽतिव्याप्तिवारणपरं "कर्मणो यदीप्सितमिति" वचनं "वारणार्थेषु कर्मग्रहणानर्थक्यं, किं कारणम् ?" कर्तुरीप्सिततमं कर्मेति वचना-दिति भाष्येण[1] प्रत्याख्यायि । माणवके अपादानत्वं प्राप्नोति । तच्च कर्मत्वेन बाध्यत इति खलु तस्याशयः । ईप्सिते अपादानत्वं चरितार्थम् । वारयतिव्यतिरेके पचत्यादौ कर्मत्वञ्चरितार्थम् । ईप्सिततम उभयप्राप्तौ परत्वात् कर्मत्वमिति भाष्यकृतो भावः । तमपोऽभावेऽपादानत्वबाधनं कर्मत्वस्य न घटेत ।

---

१. पातञ्जलमहाभाष्ये –प्रदीपोद्द्योतसहिते प्रथमाध्याये तृतीयपादे तृतीयाह्निके, २७ सूत्रे, पृ० ३६४ ।

हरिग्रन्थस्य युक्तत्वपूर्वपक्षः

"वारणार्थानामीप्सितः" (पा० सू० १।४।२७) इति सूत्रे ईप्सित इति क्तार्थकर्मणा कर्तुराक्षेपोऽङ्गीकृतः। तद्वत् कर्मसंज्ञासूत्रेऽपि 'ईप्सित' इति कर्मणा कर्तुराक्षेपेणैव सिद्धौ पुनः कर्तृग्रहणेन प्रकर्षलाभसम्भवान्माणवकादेः कर्मत्वसिद्धया तमब्ग्रहण-प्रत्याख्यानस्यैव निरुक्तभाष्यात् प्रतीत्या हर्याद्युक्तं युक्तमेव। अत एव भाष्यकृता तमब्ग्रहणादिति नोक्तम्। किन्तु "कर्तुरीप्सिततमं कर्म" इति वचना-दित्येवोक्तमिति।

समाधानम्

लघुना तमब्ग्रहणेन सिद्धे कर्मसंज्ञाविधायकसूत्रे "कर्तुरीप्सिततमं कर्म" (पा० सू० १।४।४९) इत्यत्र कर्तुरित्यस्य प्रत्याख्याने भाष्यतात्पर्यात्। स्पष्टञ्चेदं "वारणार्थानामीप्सितः" इति सूत्रे भाष्यप्रदीपोद्द्योते[1]। अत एव "कर्तुरीप्सिततमं कर्म" इति सूत्रे भाष्ये तमब्ग्रहणस्यैव माणवके अपादानत्ववारणेन कर्मत्वसिद्धिः फलं प्रत्यपादि। तथा च भाष्यम्—"इह पुनस्तमब्ग्रहणे क्रियमाणे तदुपपन्नं भवति। वारणार्थेषु कर्मग्रहणानर्थक्यम्, 'कर्तुरीप्सिततमं कर्म' इति वचना"दिति। अत एव भाष्ये तमब्ग्रहणस्य प्रयोजनमुक्त्वा कर्तुरित्यस्य प्रयोजनं नोपन्यस्तम्।

तमब्ग्रहणस्यावश्यकत्वप्रतिपादनम्

किञ्च कर्मसंज्ञाविधायकसूत्रे तमपोऽभावे यदा पुष्ट्यर्थं माषभक्षणाय माषक्षेत्र एवाश्वबन्धनं, तदा 'माषेष्वश्वं बध्नाती'त्यत्र माषाणां कर्मत्वापत्तिः। माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थस्वीकारे कर्तृग्रहणेन माषाणां कर्मत्ववारणेऽपि निरुक्तार्थस्वीकारे तदयोगात्। किञ्चात्र तमपोऽभावे "वारणार्थानामीप्सितः" (पा० सू० १।४।२७) इति सूत्रमस्यापवादस्स्यात्। वारयतिमात्र-व्यतिरेकस्यापादानत्वस्य निरवकाशत्वात्। पच्यादियोगे कर्मत्वस्य चरितार्थत्वात्। उभयोरपीप्सितत्वमात्रविषयकत्वात्। तथा 'चाग्नेर्माणवकं वारयती'त्यादावग्नि-माणवकयोरुभयोरप्यपादानत्वापत्त्या माणवकस्य कर्मत्वं न स्यात्। न च कर्मत्वाऽ-प्राप्तियोग्येऽग्नावपादानत्वस्य चारितार्थ्यं शङ्क्यम्। संयोगाद्यनुकूलव्यापारा-भावानुकूलव्यापारार्थकत्वाद्वारयतेस्तदुपस्थाप्यसंयोगरूपफलाश्रयत्वेन अग्नेरपि कर्म-त्वादेर्दुर्वारत्वात्।

---

१. पातञ्जलमहाभाष्ये—प्रदीपोद्द्योतसहिते, प्रथमाध्याये, चतुर्थपादे, तृतीयाह्निके, ४९ सूत्रे, पृ० ३७५।

न च कर्मसंज्ञाविधायकसूत्रे कर्तृग्रहणेन कर्तृव्यापारप्रयोज्यफलाश्रयस्य कर्मत्वलाभेन अग्नौ तत्त्वाभावात् तत्रापादानत्वस्य चारितार्थ्यं शङ्क्यम्। कर्तृग्रहणेन कर्तृव्यापारवाचकधातूपस्थाप्यफलाश्रयत्वमित्यर्थस्यैव लाभेन फले व्यापारप्रयोज्यत्वालाभेन निरुक्तरीत्याऽग्नावपि कर्मत्वस्यानिवारणात्। कर्तृव्यापारः= अन्तिमव्यापारश्चैत्रनिष्ठः, तद्वाचको धातुर्वारयतिः, तदुपस्थाप्यं फलमभाव इव संयोगोऽपि स्यादिति दोषतादवस्थ्यमेव। नाऽपि कर्मसंज्ञा-सूत्र ईप्सितशब्दस्याभिप्रेतपरत्वेनाग्नेरनीप्सितत्वेन कर्मत्वाऽप्राप्त्या तत्रापादानत्वस्य चरितार्थतया कथमपवादत्वमिति भ्रमितव्यम्। "वारणार्थानामीप्सितः" (पा० सू० १।४।२७) इति सूत्रस्थभाष्येणोभयत्रापीप्सितशब्दः "क्रियाशब्दो, न त्वभिप्रेतपरो रूढः" इति लाभादपवादस्य सुदृढत्वात्। अतः कर्मसंज्ञा-सूत्रे तमब्ग्रहणमावश्यकमेव, नैव प्रत्याख्येयम्।

ईप्सितशब्दो न रूढः, किन्तु क्रियापर इति विषयसमर्थनम्

"वारणार्थानामीप्सितः" इति सूत्रे भाष्ये[1] उक्तम्—"किमुदाहरणम्? माषेभ्यो गां वारयति, भवेद्यस्य माषा न गावः। तस्य माषा ईप्सितास्स्युः। तस्याऽपि माषा एव ईप्सिताः, अतश्चेप्सिता यदेभ्यो गां वारयति" इति। यस्य गावो न माषास्तत्र माषाणां कथमपवादत्वम्? तेषां परकीयत्वेन तस्यानीप्सितत्वादिति शङ्का भाष्ये। सूत्र ईप्सितशब्दोऽभिप्रेतपरो रूढो गृह्यत इत्याशयेन शङ्का। ईप्सितशब्दो न रूढः, किन्तु क्रियापरः। धात्वर्थक्रियाजन्यफलाश्रय इत्यर्थक इत्याशयेन समाधानम्। वारयत्यर्थघटकसंयोगाश्रयत्वेन माषाणामीप्सितत्वमिति तद्भावः।

अत्रार्थे कर्मसंज्ञा-सूत्रस्थभाष्यप्रामाण्यप्रदर्शनम्

एवं कर्मसंज्ञा-सूत्रस्थभाष्यादप्ययमर्थो[2] लभ्यते। तत्र हि—'दध्ना भुञ्जीय', 'पयसा भुञ्जीय' इत्यत्र दधिपयसोरीप्सितत्वात् कर्मत्वमाशङ्क्य तस्याऽप्योदन एव ईप्सिततमः, न तु गुणेष्वनुरोध इति समाहितम्। सूत्रे अभिप्रेतपरो रूढ ईप्सितशब्द आश्रीयत इति शङ्कितुराशयः। क्रिया-शब्दोऽयं, न रूढ इति समाधातुराशयः। धात्वर्थक्रियाजन्यफलाश्रय इत्यर्थक ईप्सितशब्दः। तेनौदनस्य कर्मत्वम्, न दधिपयसोः। तयोः करणत्वमेवेति तद्भावः। "वारणार्थानामीप्सितः"

---

१. पातञ्जलमहाभाष्ये—प्रदीपोद्द्योतसहिते, प्रथमाध्याये, चतुर्थपादे, तृतीयाह्निके, २७ सूत्रे, पृ० ३६१।

२. तत्रैव, १७, २९ सूत्रयोः पृ० ३६१-३६८।

(१।४।२७), "कर्तुरीप्सिततमं कर्म" (१।४।४९) इति सूत्रद्वये भाष्यप्रदीपोद्द्योतयोः स्पष्टमिदम्[१]।

अतस्तमब्ग्रहणं न प्रत्याख्येयम्; किन्तु कर्तव्यमेव। कृते तस्मिन् माषाणां कर्मत्ववारणं, माणवकादेः कर्मत्वसिद्धिश्च सुशकम्।

भर्तृहरावप्रामाण्यशङ्का

अत्रेयं शङ्का—निरुक्तदिशा कर्मसंज्ञाविधायकसूत्रे "कर्तुरीप्सिततमं कर्म" इत्यत्र कर्तृग्रहणप्रत्याख्यान एव भाष्यतात्पर्यम्, न तु तमब्ग्रहणप्रत्याख्यान इत्यस्मिन् विषये "वारणार्थानामीप्सितः", "कर्तुरीप्सिततमं कर्म" इति सूत्रद्वयस्य भाष्यार्थः प्रमाणतयोपलब्धः। तर्हि तमब्ग्रहणप्रत्याख्यानपरवाक्यपदीयग्रन्थस्याप्रामाण्यं प्रस्फुटीयत इति।

अप्रामाण्यशङ्काया निवारणम्

नैतावता गुरौ भर्तृहरावप्रामाण्यशङ्का कार्या। यतो हि महात्मानस्सम्भवमात्राभिप्रायेणान्तरान्तरानुपपन्नानर्थानुत्प्रेक्षन्ते। तावता तेषां तत्रार्थे न निर्भरः। पाठकास्तानर्थान् संशोध्य याथार्थ्यं गृह्णन्त्येवेत्येव तेषां महात्मनां प्रवृत्तिस्तत्र। यथा—महर्षेः कणादस्य वैशेषिकशास्त्रनिर्माणम्। तत्र हि परमाणूनां निरवयवत्वं प्रसाध्य तेषां संयोगाद्द्व्यणुकादिक्रमेण जगदुत्प्रेक्षितम्। महर्षेर्दृष्टिस्तु मायावादे। न हि तावता कणादमुनावविश्वासः प्राज्ञानाम्। तथैव भर्तृहरिरप्यपादानप्रकरणस्थं भाष्यार्थं पर्यालोच्यैषा रीतिरन्यत्रापि सम्भवति न वेत्युत्प्रेक्षयामास; परन्त्वियान् विशेषो यदपादानप्रकरणेऽविकृतमेव पाणिनीयं सूत्रमास्थितमितरसूत्रप्रत्याख्यानाय भाष्यकृता। भर्तृहरिणा तु सूत्रान्तरप्रत्याख्यानाय पाणिनिसूत्रे तमब्ग्रहणं परित्यक्तम्। हरेरपि तत्परित्यागे न निर्भरः। अन्यथा 'अग्नेर्माणवकं वारयती'त्यत्रापादानत्वकर्मत्वयोर्व्यवस्था तेन प्रदर्शनीया स्यात्। वारणार्थानामित्यस्य वारयितव्यानां=निवार्यमाणानामित्यर्थकरणन्त्वतिफल्गु। तावताऽपि न निस्तारः। पुष्ट्यर्थं माषभक्षणाय माषक्षेत्र एवाश्वं बध्नाति इत्यर्थपरत्वे माषेष्वश्वं बध्नातीत्यत्र माषाणां कर्मत्वापत्तेः दुस्समाधेयत्वात्। हरिहेलाराजभ्यां निरुक्तार्थे समाधिरप्रदर्शित एव। अतोऽत्रार्थे हरेर्निर्भरो नास्तीत्येव निर्णयः सुकरः। अत एव स्वातन्त्र्यमनवलम्ब्यापादानप्रकरणस्थभाष्यदृष्टान्तेन प्रकृतार्थो गुरुणा शब्दब्रह्मविदा भर्तृहरिणा प्रादर्शि। दृश्यते चेतादृशी सरणिरन्यत्रापि स्थले भर्तृहरेः। यथा—"स्वरितञितः कर्त्रभिप्राये क्रियाफले" (१।३।७२) इति सूत्रं प्रथमं भाष्याशयानुसारं व्याख्याय कर्तृगामिनि

क्रियाफले तदुपलक्षिते संविधाने वर्तमानात् स्वरितेतो ञितश्च धातोरात्मनेपदं स्यादिति व्याख्याय, पश्चात्—

"क्रियाप्रवृत्तावाख्याता केश्चित् स्वार्थपरार्थता ।
असती वा सती वाऽपि विवक्षितनिबन्धना"[1] ॥

इति कारिकया प्रकारान्तरेणोपग्रहसमुद्देशे भर्तृहरिणा व्याख्यातम् । क्रियाजन्यफलस्य कर्तृगामित्वे स्वरितञितो धातोरात्मनेपदं स्यादिति तदाशयः । अन्यथा परस्मैपदम् । मतान्तरेण प्रदर्शिता द्वितीयव्याख्यैव परमसिद्धान्ततया वैयाकरणलोकेन परिगृह्यते । बहवो व्याख्यातारो 'नागेशः कुरुते'[2] इत्यादौ यशोरूपफलस्य कर्तृगामित्वादात्मनेपदमिति भाष्यसम्मतप्रथमपक्षस्वरूपमपि न जानते ।

तथा "समर्थः पदविधिः" इति सूत्रे उपसर्जनपदार्थे संख्या-विशेषो वृत्तौ न भासत इति भाष्यकृता प्रत्यपादि । "संख्या-विशेषो भवति वाक्ये—राज्ञः पुरुषः, राज्ञोः पुरुषः, राज्ञां पुरुष इति, समासे न भवति । अस्ति कारणं येनैतदेवं भवति । किं कारणम् ? योऽसौ विशेषवाची शब्दस्तदसान्निध्यादि"ति तत्रत्यो [3]भाष्यग्रन्थः । राजपुरुष इत्यादौ शक्यतावच्छेदकराजत्वादिरूपेण राज्ञो भानम् । न त्वेकत्वादिसंख्यावैशिष्ट्येनेति तद्भाष्याशयः । भर्तृहरिणा तु तद्भाष्यार्थतया वाक्यपदीये वृत्तिसमुद्देशे[4] अभेदैकत्वसंख्या महता प्रबन्धेन प्रादर्शि । वस्तुतस्त्वभेदैकत्वसंख्येति व्यवहारो भाष्ये क्वापि नास्ति । तद्भानप्रसक्तिरपि भाष्ये कुत्रापि नैव सूचिता भगवता पतञ्जलिना ।

तद्वदेव "कर्तुरीप्सिततमं कर्म" (१।४।४९) इति सूत्रे तमपः परित्यागेन तत्प्रथमसूत्रेणैव "तथायुक्तञ्चानीप्सितम्" (१।४।५०) इत्याद्युत्तरसूत्रेषु सर्वेष्वपीप्सितत्वमात्रेण कर्मत्वं सम्पाद्यावशिष्टकर्मसंज्ञाप्रकरणप्रत्याख्यानमपि भर्तृहर्युपज्ञमेव । तावता न महात्मनि तस्मिन्नप्रामाण्यशङ्कावकाशः ।

अतः स्पृहयतियोगे विवक्षा-भेदेन द्वितीया-चतुर्थ्योष्षष्ठ्याश्च साधुत्वे न किञ्चिद्बाधकमित्येतत्प्रघट्टकार्थः ।

---

१. वाक्यपदीये तृतीयकाण्डे, अम्बाकर्त्रीसहिते, उपग्रहसमुद्देशे, श्लो० ५, पृ० ६८० ।

२. परिभाषेन्दुशेखरव्याख्यायाम्—"भैरवी"नामिकायाम्, पृ० २ ।

३. पातञ्जले महाभाष्ये—प्रदीपोद्द्योतसहिते, द्वितीयाध्याये प्रथमपादे प्रथमाह्निके प्रथमसूत्रे, पृ० १२३-१३० ।

४. वाक्यपदीये द्वितीयभागे, तृतीयकाण्डे, अम्बाकर्त्रीसहिते, वृत्तिसमुद्देशे, पृ० १२१-१०१ ।

अत्रेदं तत्त्वम्—भाष्यकारेण "ध्रुवमपायेऽपादान"मित्यनेनैव सर्वलक्ष्यसङ्ग्रहाद् अवशिष्टमपादानप्रकरणं प्रत्याख्यातम् । तमपादानप्रकरणप्रत्याख्यानरूपं भाष्यार्थं दृष्टान्तीकृत्य भर्तृहरिणा तमब्ग्रहणप्रत्याख्यानद्वारा "कर्तुरीप्सिततमं कर्म" इति प्रथम-सूत्रमपहायातिरिक्तं कर्मसंज्ञाप्रकरणं प्रत्याख्यातम् । परन्तु भाष्ये कुत्रापि कर्मसंज्ञा-प्रकरणप्रत्याख्यानं नास्ति । नापि तदर्थो ध्वनितः । अपादानप्रकरणवत् कर्मसंज्ञा-प्रकरणप्रत्याख्यानं भर्तृहरिणा कृतं यत् तत्सर्वं भर्तृहर्युपज्ञमेव । एवं रीत्यापि कर्मसंज्ञा-प्रकरणप्रत्याख्यानं सम्भावयितुं शक्यत इत्येव भर्तृहरेराशयः । वस्तुतः कर्मसंज्ञाप्रकरणप्रत्याख्याने भर्तृहरेरपि नैर्भर्यं नास्ति इत्येतादृशं हरेराशयं विशिष्या-स्मिन् विषये मया कृतं परिश्रमं मादृशानां संस्कृतज्ञानां, शास्त्रज्ञानां च विज्ञापयितु-मेव ममात्र प्रवृत्तिर्जाता, न तु महानुभावस्य गुरोर्भर्तृहरेरुपरि दोषारोपणं कर्तुमिति साञ्जलिबद्धं विनिवेदयामि ।

मीमांसकमतरीत्या तथायुक्तञ्चानीप्सितमित्यादिसूत्राणां लाक्षणिकार्थबोधकत्वप्रतिपादनम्

न्यायसुधाकारो भट्टसोमेश्वरः "कर्तुरीप्सिततमं कर्म" इति प्रथमसूत्रं शक्यार्थ-बोधकम् । अवशिष्टानि तथायुक्तञ्चानीप्सितमित्यादीनि सर्वाणि कर्मसंज्ञाविधायक-सूत्राणि लक्ष्यार्थबोधकानि । तथायुक्तञ्चानीप्सितमित्यादिसर्वेषामपि सूत्राणां शक्यार्थबोधकत्वे तु, तेषु क्रियाजनकत्वरूपशक्तेरभावात् शक्यतावच्छेदकैक्याभावेन तेषु सूत्रेष्वनेकशक्यतावच्छेदककल्पनाद्वारा अनेकशक्तिकल्पने गौरवापत्तेः । अतः "कर्तुरीप्सिततमं कर्म" इति सूत्रे तमब्ग्रहणबलात् तत्सूत्रमपहाय अवशिष्टकर्मसंज्ञा-विधायकसूत्राणि सर्वाण्यपि लक्ष्यार्थबोधकान्येवेति द्वितीयाध्याये प्रथमपादे पञ्चमे सम्मार्गाधिकरणे प्रत्यपादयत् ।

न्यायसुधाकारादिमीमांसकमतखण्डनम्

तन्न युक्तम् । तन्मते सूत्रद्वयबलेन कर्मत्वस्य अनेकविधत्वावगमाद्गौरवम् । न चैकत्र शक्तिरपरत्र लक्षणेति वाच्यम्, कुत्र शक्तिः ? कुत्र लक्षणेत्यत्र विनिगमना-विरहात् । तथा च सर्वेषां वाच्यत्वापत्तौ शक्यतावच्छेदकैक्याभावेनानेकशक्तिकल्पना-पत्तेर्दुर्वारत्वात् । अत ईप्सितानीप्सितसाधारण्येन व्याप्यत्वापरपर्यायस्य क्रियाजन्य-फलाश्रयत्वरूपस्य कर्मत्वस्य, तत्समनियताखण्डोपाधेर्वा द्वितीयावाच्यत्वं युक्तम् । अपि च तथायुक्तञ्चानीप्सितमित्यादिसूत्राणां लक्ष्यार्थबोधकत्वे प्रथमसूत्रे शक्तिः, उत्तरसूत्रेषु लक्षणेति वृत्तिद्वयकल्पने गौरवापत्तेः । जघन्यवृत्तिकल्पने मानाभावाच्च । अपि च पाणिनि-कात्यायन-पतञ्जलिभिस्सर्वेषां सूत्राणां तत्तदर्थेषु शक्तिः कल्पिता ।

ते त्रयो महर्षिकोटावग्रगण्याः। तैः परिकल्पितं सर्वेषां सूत्राणां शक्यार्थबोधकत्वं यद्वर्तते, तदुल्लङ्घ्य स्वातन्त्र्यमवलम्ब्य न्यायसुधाकारादिभिर्मीमांसकैः परिकल्पितं सर्वेषां सूत्राणां लक्ष्यार्थबोधकत्वं केवलं साहसमात्रमेव । क्षन्तव्यं किञ्चिदुद्ग्रन्थ-लेखनेन ।

उपर्युक्तरीत्या वैयाकरणानां मते लक्षणाया अभावात् "कर्तुरीप्सिततमं कर्म" इति सूत्रमिव तथा युक्तञ्चानीप्सितमित्यादिसूत्राण्यपि शक्यार्थबोधकान्येवेति वैयाकरणानामाशय इत्यलमतिविस्तरेण ।

अत्रेदं किञ्चिद्विज्ञापनीयम्—लोके सर्वाणि शास्त्राणि महत्त्वपूर्णानि। तत्तच्छास्त्रप्रवर्तका अपि महान्तो विद्वन्मूर्धन्यास्सन्ति । तैस्तत्तच्छास्त्रसम्प्रदाय-संरक्षणाय स्वस्वसिद्धान्ता व्यधायिषत । अहं व्याकरणसिद्धान्तसमन्वयसन्दर्भे वैयाकरणभूमिकां श्रुत्वा नैयायिकमीमांसकानां मतोपरि सविमर्शं किञ्चिदलिखम् । पदार्थपरिशोधनं प्रधानं लक्ष्यमभिलषय्य मेऽत्र प्रवृत्तिस्सञ्जाता, न तु विद्वन्मूर्धन्यानां तेषामुपरि दोषारोपणं कर्तुमिति सविनयं सम्प्रार्थ्य सर्वेषां पण्डितप्रकाण्डानां सविधेऽहं विनीतो बद्धाञ्जलिश्च भवामि ।

ख. "अष्टनो दीर्घात्" इति सूत्रस्थदीर्घग्रहणज्ञापकत्वविचारः

"अष्टन आ विभक्तौ" इति सूत्रे[1] "रायो हलि" इति सूत्रात् हलीत्यपकृष्यते । तच्च विभक्तेर्विशेषणम् । तेन "यस्मिन् विधिस्तदादावल्ग्रहणे" इति परिभाषया तदादिविधिः। तथा चाष्टन आत्वं स्याद् हलादौ विभक्ताविति सूत्रार्थः। अनन्तर-सूत्रं "अष्टाभ्य औश्" इति। अत्र सूत्रे "अष्टाभ्यः" इति कृतात्वस्यानुकरणम् । ननु "अष्टाभ्य औश्" इति सूत्रेण कृताकारादित्यर्थः कथं लभ्यत इति चेत्, न, तथा सति लाघवादष्टभ्य इत्येव वक्तव्ये "अष्टाभ्य" इति कृतात्वनिर्देशो जश्शसो-र्विषये हलादिविभक्तिपरकत्वाभावेऽप्यात्वं ज्ञापयति ।

ननु "अष्टन आ विभक्तौ" इति सूत्रे वा इति पदं न विद्यते। नापि तत्पदमनुवर्तते। तथा चात्वस्य नित्यतया तस्याविवक्षणेन लाघवादष्टभ्य इत्येव वक्तव्ये "अष्टाभ्य" इति दीर्घोच्चारणमयुक्तमिति चेत्, न, "अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणज्ञापकेनाष्टन आत्वं विकल्पेन भवतीति न दोषः। तथा हि—"अष्टनो दीर्घात्" इति पाणिनिसूत्रम्। दीर्घान्तादष्टनः परा असर्वनामस्थानविभक्तिरुदात्ता स्यादिति तत्सूत्रार्थः। अष्टाभिरित्युदाहरणम्। तत्र सूत्रे दीर्घग्रहणं ह्रस्वान्ता-

१. वैयाकरणसिद्धान्तकौमुदीग्रन्थे, हलन्तपुंलिङ्गप्रकरणे, ३८४ पृष्ठे, सूत्रसंख्या—७।२।८४।

दष्टनः पराया विभक्तेः अष्टनस्वरवारणाय कृतम्। यद्यात्वं नित्यमेव स्यात् तदा ह्रस्वान्ताष्टन्-शब्दस्यैवाभावेन ह्रस्वान्ताद् अष्टन्-शब्दात् पराया विभक्तेरभावेन तत्र स्वरव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं व्यर्थं स्यात्। तद्व्यर्थीभूयात्वस्य वैकल्पिकत्वं ज्ञापयति। तथा च अष्टभिरित्यत्र ह्रस्वान्ताष्टन्-शब्दात् पराया विभक्तेस्स्वर-व्यावृत्त्यर्थं "अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणं स्वांशे चरितार्थम्। अष्ट-भिरिति प्रत्युदाहरणे "षट्-त्रिचतुर्भ्यो हलादि"रिति षट्स्वरं बाधित्वा उपोत्तमस्वरः प्रवर्तते। तेनाष्टाभिरित्यत्र द्वितीयाकारः अन्तोदात्तः, अष्टभिरित्यत्र टकारोत्तरा-कारो मध्योदात्त इति विवेकः।

प्रकारत्रयेण दीर्घग्रहणस्य ज्ञापकत्वाभावप्रतिपादनं तत्खण्डनपूर्वकं ज्ञापकत्वसमर्थनञ्च

अष्टन्-शब्दात् तृतीयाबहुवचने "स्वौजसमौट्" इत्यादिसूत्रेण भिस्प्रत्यये, "अष्टन आ विभक्तौ" इति सूत्रेणाष्टन्-शब्दस्यात्वे, अन्तादेशे च कृते अष्टा+भिस् इति जाते कार्यकालपक्षे यदा कार्यं तदा संज्ञेति नियमादष्टेत्यत्र कृतात्वे नान्तत्वा-भावेन "ष्णान्ता षट्" इति सूत्रेण षट्संज्ञायाः अप्रवृत्त्या "षट्त्रिचतुर्भ्यो हलादिः" इति सूत्रस्य वा "झल्युपोत्तम"मित्युपोत्तमस्वरविधायकसूत्रस्य वा अप्रवृत्तौ तत्र "अष्टनो दीर्घात्" इति सूत्रेणाष्टनस्वरः प्रवर्तते। तथा चाष्टाभिरि-त्यत्राष्टनस्वरश्चरितार्थः। 'अष्टभ्य' इत्यत्राष्टनस्वरः प्राप्नोति, "झल्युपोत्तमम्" इत्युपोत्तमोदात्तत्वञ्च प्राप्नोति। तत्र परत्वादष्टनस्वरं बाधित्वा "झल्युपोत्तम"-मित्यस्य प्रवृत्तौ ततः "सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव" इति न्यायेन[1] अष्टनस्वरो न प्रवर्तते। तथा चाष्टभ्य इत्यत्र अष्टनस्वरस्य प्राप्तेरेवाभावाद्दीर्घ-ग्रहणस्य ज्ञापनोत्तरमपि स्वांशे चारितार्थ्यं नास्ति। अतो दीर्घग्रहणस्य ज्ञापकत्वं नैव घटत इति पूर्वः पक्षः।

स्वांशे चारितार्थ्यप्रदर्शनपूर्वकं दीर्घग्रहणस्य ज्ञापकत्वसमर्थनम्

अत्रेदं समाधानम्—"अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणज्ञापकतापरभाष्य-प्रामाण्येन[2] सकृद्गतिन्यायस्यानित्यत्वज्ञापनद्वारा पुनः प्रसङ्गन्यायस्य प्रवृत्तिं ज्ञाप-यति। तथा चाष्टभ्य इत्यत्र परत्वाज्झल्युपोत्तमस्वरे कृतेऽपि पुनः प्राप्तस्याष्टनस्वर-वारणाय दीर्घग्रहणं स्वांशे चरितार्थम्।

---

१. परिभाषेन्दुशेखरे-तत्त्वप्रकाशिका-सहिते, सूत्रे, पृ० ७०३।

२. पातञ्जल-महाभाष्ये-प्रदीपोद्द्योतसहिते, षष्ठाध्याये प्रथमपादे षष्ठाह्निके, १७२ सूत्रे, पृ० ७०३।

यद्वा अत्र यथोद्देशपक्ष आश्रीयते। तत्पक्षे भविष्यति किञ्चिदनेन प्रयोजनमित्यभिसन्धिमात्रेणाष्टन्-इत्यस्यान्तरङ्गत्वात् प्रथमं षट्संज्ञायां जातायां कृतात्वेऽपि स्थानिवद्भावेन, "एकदेशविकृतमनन्यवत्" इति परिभाषया[1] वा "अष्टा" इत्याकारान्तस्यापि षट्त्वेन तत्राऽप्यष्टनस्वरं बाधित्वोपोत्तमोदात्तस्वरे प्राप्ते अष्टनस्वरस्य निरवकाशत्वेन अपवादत्वात् प्राप्तस्याष्टनस्वरस्य वारणाय दीर्घग्रहणस्य स्वांशे चारितार्थ्यं निराबाधमेव। नान्तत्वसंख्यावाचकत्वसमानाधिकरणधर्मस्य षट्त्वस्याल्विधित्वाभावान्नात्र "अनल्विधा"विति स्थानिवद्भावनिषेधः। तथा च "अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणस्य ज्ञापकत्वं युज्यत एव।

अत्रायं प्रश्नः — यदि अष्टन्निति नान्ते विद्यमानस्य षट्त्वस्य स्थानिवद्भावेनाष्टेत्याकारान्तेऽपि अतिदेशात् कृतात्वस्याष्टेत्याकारान्तस्यापि षट्त्वेन ततः परयोर्जश्शसोः "षड्भ्यो लुक्" इति सूत्रेण लुगापत्तिरिति।

अत्रेदं समाधानम्—यदि अष्टन्निति नान्ते विद्यमानस्य षट्त्वस्य स्थानिवद्भावेनाष्टेत्याकारान्तेऽपि अतिदिश्य ततः "अष्टा" इत्याकारान्तात् परयोर्जश्शसोः षड्भ्यो लुक्" इति सूत्रेण लुक् प्रवर्तेत तदा "अष्टाभ्य औश्" इति सूत्रं सर्वथा निरवकाशं स्यात्। तथा चौश्विधानसामर्थ्यात् "अष्टौ" इत्यत्र लुङ् न प्रवर्तते। अतो दीर्घग्रहणस्य ज्ञापकत्वं युक्तमेव।

दीर्घग्रहणस्य द्वितीयज्ञापकत्वाभावप्रदर्शनं, तत्खण्डनञ्च

अत्र पुनः पूर्वपक्षः — यदि "अष्टाभ्य औश्" इत्यौश्विधानसामर्थ्यादष्टावित्यत्र लुङ् न भवतीत्युच्यते, तदा "अष्टौ" इत्यत्राष्टन्-शब्दाद्द्वितीयाबहुवचने "स्वौजसमौट्" इत्यादिसूत्रेण 'शस्'प्रत्यये शकारस्यानुबन्धलोपे "अष्टन्+अस्" इति स्थिते "अष्टन आ विभक्तौ" इति सूत्रेणाष्टन आत्वे, "अष्टाभ्य औश्" इति सूत्रेण शसः औशादेशे अष्टा+औ इति स्थिते हलादिविभक्तेरभावेन "षट्त्रिचतुर्भ्यो हलादि"रिति सूत्रेण षट्स्वरस्याप्रवृत्त्या तत्र "अष्टनो दीर्घात्" इत्यष्टनस्वरः प्रवर्तते। "अष्टौ" इत्यत्र एकादेशोत्तरं विभक्तिपरकत्वाभावादष्टनस्वरो न प्रवर्तत इत्यप्ययुक्तम्। "यद्धि तु परम्" इति सूत्रे [2]भाष्ये "स्वरात् पूर्वं सन्धिकार्यं न प्रवर्तते" इति ध्वनितत्वात्। तत्र हि भाष्ये "एही"त्यत्र आ+इहीति स्थिते यदि प्रथमत एकादेशः क्रियेत, तदा एहीत्यस्य "तिङ्ङतिङः" इति निघातो न स्याद् इत्युक्तम्। तदा च "नेन्द्रस्य परस्य" इति सामान्यापेक्षं ज्ञापकम्। अनेन भाष्येण स्वरात् पूर्वं सन्धिकार्यं न

---

१. परिभाषेन्दुशेखरे—तत्त्वप्रकाशिका-सहिते, पृ० १४७।

२. पातञ्जल-महाभाष्ये—प्रदीपोद्द्योतसहिते, अष्टमाध्याये, प्रथमपादे द्वितीयाह्निके, ५६ सूत्रे, पृ० ५८-६०।

प्रवर्तत इति ध्वनितम्। तथा चाष्टाविरत्यत्राष्टनस्वरस्य सावकाशत्वाद् दीर्घग्रहणस्य स्वांशे चारितार्थ्याभावात् कथं ज्ञापकत्वमिति।

अत्रेदं समाधानम्—"अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणज्ञापकतापर-भाष्यप्रामाण्येनाष्टन् शब्दस्य घृतादिषु पाठात् "घृतादीनाञ्च" इति सूत्रेण तस्यान्तोदात्तत्वे, तत एकादेशेऽपि "एकादेश उदात्तेनोदात्तः" इति सूत्रेणोदात्त-त्वसिद्धेस्तत्राष्टनस्वरो निरवकाश एव। एवञ्च अष्टाभिरित्यत्र निरवकाशत्वात् प्राप्तस्य अष्टनस्वरस्य वारणाय दीर्घग्रहणस्य स्वांशे चारितार्थ्यं वर्तत इति ज्ञापकत्वं निराबाधम्।

दीर्घग्रहणस्य तृतीयज्ञापकत्वाभावप्रतिपादनं तत्खण्डनञ्च

अत्र पुनः पूर्वपक्षः—षट्त्स्वरविधायके "षट्त्रिचतुर्भ्यो हलादि"रिति सूत्रे विहितविशेषणमावश्यकम्। तथा च प्रियाष्टाभ्यामित्यादावष्टन्-शब्दाद्विभक्तेर-विधानात् तत्र षटत्स्वरो न प्रवर्तते। तथा च तत्र षट्त्स्वरस्याप्राप्त्या अष्टनस्वरस्य सावकाशत्वाद्दीर्घग्रहणस्य स्वांशे चारितार्थ्याभावात् कथं ज्ञापकत्वं घटते। तत्र षट्स्वरविधायके विहितविशेषणस्वीकारे "चतुरश्शसि" इति सूत्रस्थं "स्त्रियां प्रतिषेधो वाच्यः" इति वार्तिकं, तद्व्याख्यानभाष्यञ्च[1] प्रमाणम्। तथा हि—"चतुरश्शसि" इति सूत्रेण चतुश्शब्दात् पराया विभक्तेरन्तोदात्तत्वं विधीयते। एष स्वरः स्त्रीलिङ्गे "चतस्रः पश्य" इत्यत्र प्राप्नोतीति तत्र तद्वारणाय "स्त्रियां प्रतिषेधो वाच्यः" इति वार्तिककृतोक्ते भाष्यकारः "चतुरश्शसि स्त्रियां अप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः, इह शसि स्वरः कस्मान्न भवति? आद्युदात्तनिपात-नात्। आद्युदात्तनिपातनं करिष्यते। स निपातस्वरः शसिस्वरस्य बाधको भविष्यति" इत्यवदत्। एवञ्च "चतस्रः पश्य" इत्यत्र चतस्रयाद्युदात्तनिपात-नेनान्तोदात्तत्वसिद्धेर्भाष्यकृता वार्तिकं प्रत्याख्यातम्। चतसृणामित्यत्र विभक्ति-स्वरोऽपि "षट्त्रिचतुर्भ्यो हलादि"रिति सूत्रे हलादिग्रहणेन निपातनस्वरो विभक्तिस्वरस्य बाधको न भवतीति ज्ञापनात् सिद्ध्यति। तथा हि—षट्त्रिचतुरां बहुवचनविषयत्वाद्द्विवचनैकवचने न स्तः। अन्या हलादयः। उपसमस्ते सम्भवेऽपि विहितविशेषणान्न दोषः। तत्र षड्भ्यः परयोर्जश्शसोर्लुगेव। अन्या हलादयः। त्रिशब्दे जसि नेदम्, असर्वनामस्थान इत्यधिकारात्। शसि "एकादेश उदात्ते-नोदात्तः" इत्यनेनैव सिद्धम्। अन्या हलादयः। तिस्रयपि "तिसृभ्यो जस" इत्यनेन भाव्यम्। तिस्रः पश्येत्यत्र "उदात्तयणो हल्पूर्वात्" इत्यनेन भाव्यम्। चतुश्शब्दे

१. पातञ्जल-महाभाष्ये-प्रदीपोद्द्योतसहिते, षष्ठाध्याये प्रथमपादे षष्ठाह्निके, १६७ सूत्रे, पृ० ६९७-६९८।

जसि असर्वनामस्थान इत्यनुवृत्त्या न दोषः। तस्मात् "चतस्रः पश्य" इत्येव तद्व्यावर्त्यम्। यदि निपातनस्वरो विभक्तिस्वरं बाधेत, तदा समासे "प्रियतिस्रा" इत्याद्येकवचनादिषु षट्त्स्वरप्राप्तौ तद्वारणाय हलादिग्रहणस्य व्यावर्त्यसम्भवे "हलादिग्रहणानर्थक्यं, न ह्यन्यद्धलादिग्रहणं प्रयोजयति, अन्यदतश्चतसृशब्दात्" इति भाष्योक्तं भज्येत। अष्टौ, परमाष्टावित्यादौ विहितविशेषणत्वाङ्गीकारेऽपि "एकादेश उदात्तेनोदात्तः" इत्यनेन स्वरस्सिद्ध्यतीति न दोषः। तथा च प्रियाष्टाभ्यामित्यादावष्टनस्वरस्य सावकाशाद् दीर्घग्रहणस्य स्वांशे चारितार्थ्याभावात् कथं ज्ञापकत्वं घटत इति।

अत्रेदं समाधानम्—"अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणस्य ज्ञापकतापरभाष्यप्रामाण्येन "अष्टनो दीर्घात्" इति सूत्रेऽपि विहितविशेषणाश्रयणात् 'प्रियाष्टाभिः' इत्यत्र अष्टनस्वरो न प्रवर्तत इति तस्य निरवकाशाद् अष्टभिरित्यत्र प्राप्तौ तत्र तद्वारणाय दीर्घग्रहणं स्वांशे चरितार्थम्। किञ्च षट्संज्ञासूत्रे भाष्ये "प्रियाष्टादीनामनभिधानमेव" इति स्पष्टमुक्तत्वाच्च। इदं वार्तिकमतरीत्या।

वस्तुतस्तु विहितविशेषणमप्रमाणमेव। "तिसृभ्यो जसः" इति सूत्रे वार्तिककृता जस्-ग्रहण प्रत्याख्यातम्। कुत इति चेत्, त्रिशब्दस्य बहुवचनविषयत्वेनैकवचनद्विवचने न स्तः। तृतीयाद्यारभ्यान्या हलादयः। एवञ्च जस एव "तिसृभ्यो जसः" इति सूत्रेणान्तोदात्तो भवतीति तत्सूत्रे जस्-ग्रहणस्य अनावश्यकत्वात्। तत्र भाष्यकार आचार्यान्तरसंवादमवष्टभ्य "उपसमस्तार्थमेके जस्-ग्रहणमिच्छन्ती"त्यवदत्। समस्ततिसृशब्दसमीपजन्यविभक्तिस्वरव्यावृत्त्यर्थं जस्-ग्रहणमिति तद्भाष्यार्थः। एतद्भाष्येण "तिसृभ्यो जसः" इति स्वरः "प्रियतिसृ" इत्यादौ तदन्ते यथा भवति, तथैव प्रियाष्टाभ्यामित्यत्र षट्त्स्वरोऽपि तदन्ते प्रवर्तते। एवञ्च प्रियाष्टाभ्यामित्यत्र तदन्तेऽपि षट्त्स्वरस्य प्रवृत्त्याऽष्टनस्वरस्य निरवकाशत्वादष्टनस्वरे प्राप्ते तद्वारणाय दीर्घग्रहणस्य स्वांशे चारितार्थ्यं वर्तत इति ज्ञापकत्वं युज्यत एव। विहितविशेषणास्वीकारे "चतुरश्शसि" इति सूत्रवार्तिकादिकं विरुणद्धीत्यपि वक्तुं न शक्यते। "तिसृभ्यो जस्-ग्रहणानर्थक्यमि"ति वार्तिकं भाष्ये यथा दूषितं तद्वदेव "चतुरश्शसि" इति सूत्रस्थवार्तिकादिकमपि दूषितप्रायमेव। अत एव भाष्ये[1] "उपसमस्तार्थमेके" इत्यादिग्रन्थे 'एके' इति भाष्योक्तं स्वरसतया सङ्गच्छते। एवञ्च "अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणस्य ज्ञापकत्वं सुस्थमेव।

---

१. पातञ्जल-महाभाष्ये-प्रदीपोद्द्योतसहिते, षष्ठाध्याये प्रथमपादे षष्ठाह्निके, १६६ सूत्रे पृ० ११० ।

ग. "समर्थः पदविधिरि"ति सूत्रार्थविचारः

श्रीमता पाणिनिना अष्टाध्यायी व्यरचि। तस्मिन् ग्रन्थेऽष्टावध्यायाः, प्रत्यध्यायं चत्वारः पादाश्च वर्तन्ते। आहत्य ३,८९१ सूत्राणि सन्ति। तत्र द्वितीयाध्याये प्रथमपादे प्रथमसूत्रं भवति "समर्थः पदविधिः" इति। समर्थः, पदविधिरिति पदच्छेदः। विधिरित्यत्र विपूर्वक-धाधातोः "उपसर्गे घोः किः" इति सूत्रेण कर्मणि किप्रत्यये, तस्य कित्वात् "आतो लोप इटि च" इति सूत्रेण धाधातोराकारस्य लोपे ततो "विधि" इत्यस्य कृदन्तत्वेन प्रातिपदिकसंज्ञायाम्, ततः प्रथमैकवचने सुप्रत्यये, सस्य रुत्वविसर्गयोः कृतयोः विधिरिति निष्पन्नम्। विधीयत असाविति विधिरिति कर्मव्युत्पत्त्या कार्यमिति तदर्थो लभ्यते। पदस्य विधिः पदविधिः। पदसम्बन्धिकार्यमिति तदर्थः। सूत्रे समर्थशब्दो लक्षणया समर्थाश्रितो भवति। एवञ्च पदसम्बन्धी यो विधिस्स समर्थाश्रितो बोध्य इति सूत्रार्थः। सामर्थ्यं द्विविधम्—एकार्थीभावो व्यपेक्षा चेति।

एकार्थीभावस्वरूपम्

पदद्वयबोध्ययोरर्थयोरेकपदबोध्यत्वमेकार्थीभावः। तद्यथा—राजपुरुष इत्यत्र राज्ञः पुरुष इति विग्रहे राजन्+ङस्, पुरुष+स् इत्यवस्थायां राजपदं राजत्वावच्छिन्नं राजानं बोधयति। पुरुषपदं पुरुषत्वावच्छिन्नं पुरुषं बोधयति। विग्रहावस्थायां राजपुरुषपदयोश्शक्तिद्वयं क्लृप्तम्। समासे तु क्लृप्तावयवशक्त्योस्त्यागपूर्वकं राजन्+ङस्, पुरुष+स् इति समुदाये विशिष्टा शक्तिः कल्प्या। तथा च राजन्+ङस्, पुरुष+स् इति समुदायो राजान्यस्वामिकत्वाभाववद्राजसम्बन्धिपुरुषे शक्त इत्यर्थं बोधयति। इदमेवैकार्थीभावस्वरूपम्।

अत्रायं प्रश्नः

पदद्वयबोध्ययोरर्थयोरेकपदबोध्यत्वमेकार्थीभाव इत्युक्ते "राजपुरुष" इत्यादिसिद्धावपि दाशरथिः, पाचक इत्यादौ पदद्वयस्याभावात् तत्रैकार्थीभावो न प्रवर्तेत इति।

अत्रेदं समाधानम्

पदद्वयबोध्ययोरित्यादिपूर्वोक्तलक्षणे दाशरथिः, पाचक इत्यादो इञ्ण्वुलादीनां प्रत्ययत्वेन पदत्वाभावात् तत्र समर्थः पदविधिरिति सूत्रेणैकार्थीभावस्याप्रवृत्तिरित्याशयेन वैयाकरणसिद्धान्तलघुमञ्जूषायाम् एकार्थीभावस्य लक्षणान्तरमुक्तम्। तच्च "यत्किञ्चित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके प्रसिद्धानां पदार्थानां विशिष्ट-

विषयैकशक्त्या एकोपस्थितिजनकत्वमेकार्थीभाव" इति। तथा च दाशरथिरित्यादौ दशरथस्यापत्यमित्यर्थे इञ्-प्रत्ययस्य पदत्वाभावेऽपि तद्बोध्यार्थबोधकापत्यमिति शब्दस्य लोके प्रसिद्धत्वात् तदादाय तत्रैकार्थीभावप्रवृत्तौ न दोषः। एवमेव पाचक इत्यादावपि। अत एव मञ्जूषायां नागेशेन यत्किञ्चित्पदजन्येत्युक्तम्। इदमेवैकार्थीभावस्वरूपम्। एतादृशैकार्थीभावः कृत्तद्धितादिपञ्चसु वृत्तिषु प्रवर्तते। अत एव 'औपगवः' 'दाशरथिः' 'पाचकः' इत्यादौ अणादितद्धितप्रत्ययाः, ण्वुलादिकृत्प्रत्ययाश्च भवन्ति। पृथगर्थानामेकार्थीभावस्समर्थवचनं कर्तव्यम्। क्व पृथगर्थानि, क्व एकार्थानि, वाक्ये पृथगर्थानि—राज्ञः पुरुष इति। समासे एकार्थानि—'राजपुरुष' इति। इति समर्थसूत्रस्थभाष्याद् वृत्तावेकार्थीभावः प्रवर्तते। परस्परव्यपेक्षां सामर्थ्यमेके। का पुनः शब्दयोर्व्यपेक्षा—न ब्रूमश्शब्दयोरिति। किं तर्हि? अर्थयोः। इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते, ममाऽयमिति। पुरुषोऽपि राजानमपेक्षते 'अहमस्य' इतीत्यादिभाष्याद्व्यपेक्षापक्षो वाक्य आश्रयणीयः। तथा च व्यपेक्षा-पक्षे राजपुरुष इति समुदायेऽवयवशक्त्यतिरिक्ता समुदाये शक्तिर्नास्ति। आकाङ्क्षावशाद्राजपुरुष इत्यादावर्थोपस्थितिर्भवति।

व्यपेक्षा-वादिमतम्

समर्थसूत्रार्थविवरणावसरे व्यपेक्षावादिन एवमाहुः—"परस्परव्यपेक्षां सामर्थ्यमेके" इति भाष्याद् व्यपेक्षा-पक्ष एव भाष्यसम्मतः। विशिष्टशक्तिवादे समासात् प्राग्वाक्ये विद्यमानावयवशक्तेः क्लृप्तायास्त्यागः, अक्लृप्तसमुदायशक्तिस्वीकार इत्यतिगौरवम्। अस्मिन् पक्षे "राज्ञः पुरुष" इत्यादौ परस्परसाकाङ्क्षयोः राजपुरुषयोस्सम्बन्धस्य राजादिपदोत्तरविभक्तिर्वाचिकेति।

व्यपेक्षापक्षवादिमतखण्डनद्वारा एकार्थीभावसमर्थनम्

तन्न। विशिष्टशक्त्यस्वीकारे राज्ञः पुरुष इति स्वतन्त्रवाक्य इव राजपुरुष इत्यत्रापि राज्ञः स्वातन्त्र्येणोपस्थितिसत्त्वाद् राजपदार्थे ऋद्धस्य विशेषणस्यान्वयापत्तौ ऋद्धस्य राजपुरुष इति प्रयोगापत्तिः। किञ्च भाष्ये अथैतस्मिन् व्यपेक्षायां योऽसावेकार्थीभावकृतो विशेषस्स वक्तव्यः" इत्यादिना व्यपेक्षापक्षो दूषितः।

प्रकृतभाष्यार्थविवरणम्

वृत्तावेकार्थीभावानभ्युपगमे वाक्य इव वृत्तावुपसर्जनपदार्थे विशेषणान्वयादीनां प्रसङ्गात् तदभावो वचनेन प्रतिपाद्यः। एकार्थीभावाभ्युपगमे तु न किञ्चिद्वचनेन प्रतिपाद्यम्। एवञ्च तत्तद्वचनकरणरूपगौरवग्रस्तत्वाद् व्यपेक्षापक्षो नाश्रयणीय इति तस्य भाष्यस्यार्थः।

अपि च समासे विशिष्टशक्त्यस्वीकारे पङ्कजपदेऽपि समुदायशक्तिर्न सिद्ध्येत्। इष्टापत्तिस्तु न कार्या। तथा सति सकलतान्त्रिकसिद्धान्तो विरुध्येत। तत्परिपालनलोभेन तत्र विशिष्टशक्तिस्वीकारे तु सर्वत्रापि वृत्तौ सा सेत्स्यति। अर्धजरतीयत्वस्यान्याय्यत्वात्। पङ्कजपदे यदि विशिष्टशक्तिर्न स्यात् तदा पङ्के जातमित्यवयवार्थेनैव पङ्कजाधिकरणकोत्पत्त्याश्रय इति बोधोपपत्तौ तत्रापि समुदायशक्तिर्व्यर्था स्यात्। न च पङ्कजपदे पद्मत्वेन रूपेण पद्मभानाय तत्र समुदायशक्तिरिति वाच्यम्, चित्रगुरित्यत्रापि चित्राभिन्नगोसम्बन्धीत्यवयवशक्त्योपस्थितावपि स्वामित्वेन रूपेणान्यपदार्थोपस्थितये समुदायशक्तिरावश्यकी। 'चित्रगु'रित्यत्र स्वामिबोधनाय यदि लक्षणा तर्हि पङ्कजपदेऽपि तत्तुल्यम्।

एकार्थीभावानभ्युपगमे मीमांसकानां रथकाराधिकरणविरोधप्रदर्शनम्

एकार्थीभावस्यैव विशिष्टशक्तिः, जहत्स्वार्थेत्यादिनामान्तराणि वर्तन्ते। तत्र वृत्तौ विशिष्टशक्त्यस्वीकारे मीमांसकानां रथकाराधिकरणं विरुध्येत। तथा हि—"वर्षासु रथकारोऽग्निमादधीत" इति वेदवाक्यं वर्तते। तत्र रथकारपदेन रथं करोतीति व्युत्पत्त्या त्रैवर्णिकस्य ग्रहणमुत रूढ्या प्रतिलोमजातिविशेषस्य ग्रहणमिति संशय्य "योगाद्रूढिर्बलीयसीति" न्यायेन प्रतिलोमजातिविशेषस्यैव ग्रहणं न तु रथनिर्माणकर्तृद्विजातानामित्युक्त्वा रथकारत्वजात्याश्रयस्य श्रुत्यन्यथानुपपत्त्या वेदाध्ययन-आधानसिद्धाग्न्यभावेऽपि आधानमात्रोपयोगिवेदाध्ययनं तत्र कल्प्यत इति सिद्धान्तितम्। व्यपेक्षावादे अवयवार्थमादाय त्रैवर्णिकानां विषये विधेश्चरितार्थतया मीमांसकम्मन्यानामधिकरणविरोधः स्पष्ट एव।

अपि च विशिष्टशक्त्यस्वीकारे "राजपुरुष" इति समासे ऋद्धस्येत्यादिविशेषणान्वयवारणाय "सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो नेति" वचनमपूर्वं वक्तव्यम्। अस्माकन्तु पदार्थैकदेशत्वेन न तत्र विशेषणान्वय इति न्यायसिद्धम्। किञ्च व्यपेक्षावादे "राज्ञः पुरुष" इति प्रयोगस्यावश्यकप्राप्तावारभ्यमाणस्समासो येन नाप्राप्तिन्यायेन तं बाधते। अतस्तन्मते वाक्यसमासयोरुभयोरपि साधुत्वबोधनाय "विभाषा"-वचनमपूर्वं कर्तव्यम्। किञ्च "धवखदिरौ" इत्यत्र, एवं निष्कौशाम्बिः, गोरथ इत्यादौ च चकारलोपादिर्वक्तव्यः। तथा हि-"धवखदिरौ" इत्यत्र धवश्च खदिरश्चेति विग्रहवाक्ये चकारदर्शनाद्वृत्तावपि चकारः श्रूयेत। अन्यथा तस्य विग्रहत्वं न स्यात्। समाससमानार्थकवाक्यस्यैव विग्रहत्वात्। एवञ्चार्थभानाय वृत्तावपि च शब्दप्रयोगे धवखदिराविति प्रयोगो न सिद्ध्यतीति तदर्थं "द्वन्द्वे च लोप" इति वचनमपूर्वं कर्तव्यम्। एवमेव "निष्कौशाम्बिः", "गोरथः", "घृतघटः", "गुडधानाः", "केशचूडः", "सुवर्णालङ्कारः",

"द्विदश", "सप्तपर्ण" इत्यादावतिक्रान्त-युक्त-पूर्ण-मिश्र-सङ्घात-विकार-सुच्प्रत्ययानां लोपो वक्तव्य इत्यतिगौरवम्। विशिष्टशक्तिवादे तु विशिष्टस्य विशिष्टे शक्तिरिति न दोषः।

ननु समासे लक्षणयैव निर्वाहान्न पूर्वोक्तदोषावकाश इति चेत्, न, यदि तत्र लक्षणा स्वीक्रियेत ,तर्हि लक्षणावादिनस्तव बहुव्युत्पत्तिभञ्जनं कर्तव्यम्। तथा हि—

व्यपेक्षावादिमते विशिष्टशक्त्यस्वीकारे बहुव्युत्पत्तिभङ्गप्रकारः

(क) समानाधिकरणनामार्थयोरभेदान्वयः।

(ख) नामार्थ-धात्वर्थयोर्भेदेन साक्षादन्वयोऽव्युत्पन्नः।

(ग) प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्।

(घ) पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन।

(ङ) प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वम्।

(च) नामार्थप्रकारकबोधे विशेष्यतया विभक्तिजन्योपस्थितिर्हेतुः।

उपर्युक्तानामेतासां व्युत्पत्तीनां भङ्गो व्यपेक्षावादे। तथा हि—"चित्रगु"-रित्यत्र चित्राभिन्नगोस्वामीति प्रतीतिरनुभवसिद्धा। सा च विशिष्टशक्तिमन्तरा न सिद्ध्यति। न च तत्र लक्षणा। "प्राप्तोदको ग्राम" इत्यादावभीष्टार्थनिर्वाहक-लक्षणाया असम्भवात्। तथा हि—प्राप्तोदक इत्यत्र प्रपूर्वकाप्लृधातोः प्राप्तिरर्थः। क्तप्रत्ययस्य कर्ता अर्थः। तस्योदके अभेदेनान्वयः। ततस्सम्बन्धिनि लक्षणायामपि प्राप्तिकर्त्रभिन्नोदकसम्बन्धो ग्राम इत्येव बोधस्स्यात्। न तूदककर्तृकप्राप्तिकर्मग्राम इत्यभीष्टार्थबोधः। मम तु "प्राप्तोदक"पदस्योदककर्तृकप्राप्तिकर्मणि शक्तिरिति न दोषः। ननु उदकस्य धात्वर्थे प्राप्तौ कर्तृत्वेनान्वये, ततः क्तप्रत्ययस्य कर्मणि लक्षणायां न दोष इति चेत्, न, "समानाधिकरणनामार्थयोरभेदान्वय" इति व्युत्पत्ति-विद्यते। यद्युदकस्य धात्वर्थे प्राप्तौ कर्तृत्वसम्बन्धेन भेदेनान्वये सा व्युत्पत्तिर्भिद्येते। किञ्च उदकस्य नामार्थस्य धात्वर्थे प्राप्तौ कर्तृतासम्बन्धेन भेदेनान्वये "नामार्थयो-र्भेदेन साक्षादन्वयोऽव्युत्पन्न इति व्युत्पत्तिर्भिद्येत। एतद्व्युत्पत्त्यनङ्गीकारे तण्डुला-भिन्नकर्मवृत्तिविक्लित्त्यनुकूलो देवदत्तकर्तृको व्यापार इति बोधे "देवदत्तेन पच्यते तण्डुल" इति प्रयोगस्येव देवदत्तस्य नामार्थस्य धात्वर्थे पाके कर्तृता-सम्बन्धेनान्वयात् "देवदत्तः पच्यते तण्डुल" इति प्रयोगस्याऽपि साधुत्वापत्तिः।

ननूदकस्य प्रत्ययार्थे कर्तर्यभेदेन, तस्य च धात्वर्थे प्राप्तावन्वयानन्तरं तत्सम्बन्धिनि ग्रामे लक्षणाश्रयणान्न दोष इति चेत्, न, तथा सति "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति" व्युत्पत्तिभङ्गापत्तिः। कुत इति चेत्, प्रत्ययार्थस्य

कर्तृधात्वर्थेऽन्वये तस्य विशेष्यत्वाभावात्। किञ्च प्राप्तपदे प्राप्तेर्विशेष्यत्वेन तस्या एव नामपदजन्यप्रतीतिविशेष्यत्वेन प्राप्तपदार्थैकदेशप्राप्तावुदकपदार्थस्यान्वयानापत्तेः। 'पदार्थः पदार्थेनान्वेतो'ति व्युत्पत्तेः। अन्यथा तद्व्युत्पत्तिर्भिद्येत। किञ्च क्तप्रत्ययस्योदकशब्दाप्रकृतिकतया तस्य उदकपदार्थान्वितस्वार्थबोधकत्वानुपपत्तिः। "प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति" व्युत्पत्तेः, अन्यथेयं व्युत्पत्तिर्भिद्येत।

अथ च विशिष्टशक्त्यस्वीकारे 'राजपुरुष' इत्यादौ राजपदार्थस्य पुरुषेऽभेदेनान्वयानन्तरं तत्सम्बन्धिनि ग्रामे लक्षणायामपि "नामार्थप्रकारकबोधे" इत्यादिव्युत्पत्तेर्विशिष्टादेव प्रत्ययोत्पत्तेः पुरुषादेर्विभक्तिजन्योपस्थितिविषयत्वाभावात् राजसम्बन्धिरूपनामार्थस्य पुरुषेऽन्वयो न स्यात्। एतद्व्युत्पत्त्यनङ्गीकारे कर्मतासम्बन्धेन तण्डुलवृत्तिः पाक इति बोधतात्पर्ये 'तण्डुलः पचतोति' प्रयोगापत्तिः। एतद्व्युत्पत्त्याश्रयणे तु कर्मता-सम्बन्धेन तण्डुलादेः पाकादावन्वया न भवतोति न दोषः।

ननु 'शुभ्रस्तण्डुल' इत्यादावपि विभक्तिजन्योपस्थितेरभावात् कथं शुभ्रस्य तण्डुलेऽन्वय इति चेत्, न, तत्राभिहिते प्रातिपदिकार्थे प्रथमाया विधानात् प्रातिपदिकार्थकप्रथमार्थे तण्डुलस्य, तस्य च शुभ्रेऽभेदेनान्वयाच्च न दोषः। ननु शुभ्रस्तण्डुल इत्यत्र व्यभिचारवारणेऽपि 'शुभ्रेण तण्डुलेन' इत्यत्र प्रातिपदिकार्थे तृतोयादेरविधानात् तत्र शुभ्रपदार्थस्य तण्डुल एवान्वयात् तस्यापि व्यभिचारो दुर्वार एवेति चेत्, न, तत्रापि नामार्थस्य साक्षान्नामार्थान्तरेऽनन्वयेन विभक्त्यर्थस्यैव तण्डुलादावन्वयेन न तद्व्युत्पत्तिव्यभिचारः।

विशिष्टशक्तिस्वीकारे भिन्नोपस्थितिविषयाणां व्युत्पत्तोनामेकोपस्थितिनियामकसमुदायशक्त्याश्रयसमासादिवृत्तावप्रवृत्तेर्नास्माकं मते तत्तद्व्युत्पत्तिभङ्गः।

वस्तुतस्तु 'चित्रगु'रित्यत्र लक्षणाऽप्ययुक्ता। तत्र विशिष्टशक्तिमन्तरा स्वाम्यादिप्रतीतिर्न सिध्यति। तत्र लक्षणा नाश्रयितुं युक्ता। यदि चित्रपदे लक्षणा तर्हि चित्रस्वामो गौरिति बोधापत्तेः। नाऽपि गोपदे। तथा सति गास्वामो चित्र इति बोधापत्तेः। किञ्च चित्रपदे लक्षणायां चित्रस्वामीति पदार्थे चित्रस्य पदार्थैकदेशत्वेन तत्र गवादेरन्वयो न स्यात्। "पदार्थः पदार्थेनान्वेताति" न्यायात्। अन्यथा "पदार्थः पदार्थेनेति" व्युत्पत्तिविरोधः स्यात्। ननु चित्रपदार्थस्य प्रथमं गोपदार्थेऽभेदेन अन्वयः। अनन्तरं गोपदे तत्स्वामिनि लक्षणायां न कश्चिद्दोष इति चेद्विनिगमनाविरहाच्चित्रपदे न लक्षणा, किन्तु गोपद एवेत्ययुक्तत्वात्।

ननु गोपदे लक्षणा-स्वीकारे गोपदार्थस्य द्रव्यतया लक्ष्येण स्वामिना सम्बन्धः स्वस्वत्वनिरूपितस्वामित्वरूपस्साक्षात्सम्बन्धः। चित्रपदे तत्स्वीकारे तु तच्छक्यार्थस्य गुणरूपतया लक्ष्येण स्वामिना द्रव्यद्वारकः स्वशक्यसमवायिनिष्ठस्वत्वनिरूपितस्वामित्वरूपस्सम्बन्धः परम्परा-सम्बन्धः। तथा च साक्षात् सम्बन्धे सम्भवति परम्परा-सम्बन्धस्य ग्रहीतुमशक्यतया गोपद एव लक्षणा न चित्रपदे इति चेत्, उच्यते—एवं तर्हि चित्रगुरित्यत्र लक्षणास्वीकारेऽप्यषष्ठ्यर्थबहुव्रीहौ 'प्राप्तोदकः', 'कृतविश्व' इत्यादौ विनिगमकाभावाल्लक्षणा नाश्रीयते। अतो व्यपेक्षावादिभिरप्यगत्या विशिष्टशक्तिरेवाश्रयणीया, न लक्षणादिकम्।

चित्रगुरित्यत्र लक्षणाश्रयवतां नैयायिकानां मतवर्णनम्

अत्र नैयायिकाः—चित्रगुरित्यादौ न केवलं चित्रपदे लक्षणा। तथा सति चित्रस्वामी गोरिति बोधापत्तेः। नाऽपि गोपदे सा। तथा सति गोस्वामी चित्र इति बोधापत्तेश्च। अतः प्राप्तोदकमित्यादौ पदद्वये लक्षणा अङ्गीकर्तव्येति।

न्यायमतखण्डनम्

उपर्युक्तनैयायिकाशयो न सम्यक्। "चित्रस्वामी गौः, गोस्वामी चित्र" इति बोधावृत्तिप्रसङ्गात्। न च परस्परं तात्पर्यग्राहकत्वादेकस्यैकदेव लक्षणा, न द्वयोरिति न बोधावृत्तिरिति वाच्यम्, एवमपि विनिगमनाविरहेण लक्षणाया असम्भवात्। "प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्व"मिति व्युत्पत्त्या गोपद एव लक्षणेत्यपि न युक्तम्। उत्तरपदमात्रस्यैवान्यार्थप्रतिपादकतयाऽन्यपदार्थे वर्तमानानेक सुबन्ताभावाद् बहुव्रीह्यनुपपत्तिः। किञ्च घटादिपदेष्वकारादीनां चरमवर्णानामेव वाचकत्वम्, पूर्वभागे लक्षणा स्यात्। न च चरमवर्णमात्रश्रवणे घटाद्यर्थबोधो न भासत इति वाच्यम्, तथा सति 'प्राप्तोदक' इत्यत्राऽप्युदकपदमात्रश्रवणादर्थबोधो दुर्वार एव। किञ्चावयवानां शक्ति, लक्षणां वाऽजानतामपि बालानां समुदायव्युत्पादने बोधस्सर्वानुभवसिद्धः। पूर्वोक्तदोषग्रस्तत्वाद्व्यपेक्षापक्षो नाश्रयणीयः। किन्तु वृत्तौ विशिष्टशक्तिरेवाश्रयणीयेति दिक्।

विशिष्टशक्तिमनङ्गीकुर्वतां नैयायिकमीमांसकादीनां मतप्रदर्शनम्

अत्र नैयायिकमीमांसकादयः—समासादिवृत्तिषु समुदायशक्तिस्वीकारे यानि प्रयोजनान्युपसर्जने विशेषणान्वयाभावादीनि तानि सर्वाण्यपि त्वन्मत इव मन्मतेऽपि लक्षणावादे तत्तद्वचनाकरणेऽपि सिद्ध्यन्त्येव। परन्तु तव विशिष्टशक्तिकल्पनागौरवमवशिष्यते। तथा हि—पदशक्त्यैवोपपत्तौ विशिष्टशक्तिरनावश्यकी। राजपुरुष

इत्यादितोऽभीष्टार्थलाभस्तु सम्बन्धिनि लक्षणयेव भवति । राजपदस्य सम्बन्धिनि लाक्षणिकत्वादेव तत्र विशेषणान्वयो न भवति । "पदार्थः पदार्थेनान्वेतो"ति न्यायात् । एवञ्च "सविशेषणानामि"ति वार्तिकमस्माकं मतेऽपि नाऽपूर्वम् । नाऽप्यस्माकमिवादि-शब्दलोपविधानमावश्यकम् । कुत इति चेत्, 'घनश्याम' इत्यादौ घनादिशब्दे घनसदृशे लक्षणास्वीकारेण घनशब्देनैव सादृश्यस्योक्ततया 'उक्तार्थानामप्रयोगः' इति न्यायेने-वादीनां शब्दानां प्रयोग एव न भवति । किञ्च समासे लक्षणया राजसम्बन्ध्यभिन्नः पुरुष इति बोधनेच्छया राजपुरुष इति, व्यस्ते राज्ञः पुरुष इत्यस्माकं मतेऽपि विभाषावचनं सिद्धार्थानुवादकमेव । पङ्कजपदे विशिष्टशक्तिस्वीकारेऽपि न दोषः । यतस्तत्र अवयवज्ञानसहितस्य, तज्ज्ञानरहितस्य च बोधात् तत्र लक्षणाया वक्तुमशक्य-तया समुदायशक्तिराश्रीयते । न च 'चित्रगु'रित्यादौ लक्षणासम्भवेऽपि 'प्राप्तोदक' इत्यादौ लक्षणाया असम्भवात् । तत्र लक्षणायां बहुव्युत्पत्तिभङ्ग इति वाच्यम् । 'प्राप्तोदक' इत्यादावुदकपदस्यैवोदककर्तृकप्राप्तिकर्मणि लक्षणेति न दोषः । नामार्थस्योदकस्य कर्तृतासम्बन्धेन धात्वर्थेऽन्वयोऽपि न सम्भवति । 'प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वमिति' व्युत्पत्तेः । एवञ्च "नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयोऽप्यव्युत्पन्न' इति व्युत्पत्तिविरोधोऽपि नास्ति । किञ्च घटादिपदे चरमवर्णस्यैव वाचकत्वे इष्टापत्तिरेव । यतो हि तत्र चरमवर्णस्यात्यन्तप्रत्ययसन्नि-धानेऽपि तस्य बोधकत्वाननुभवात् समुदायस्यैव वाचकत्वं कल्प्यत इति न दोष इति वदन्ति ।

नैयायिकमीमांसकमतखण्डनम्

तन्न । समासे विशिष्टशक्त्यस्वीकारे राजपुरुष इत्यादिसमुदायस्यार्थवत्त्वा-भावेन प्रातिपदिकसंज्ञा तत्र न प्राप्नोति । तथा सति समासाद्विभक्तिर्न स्यात् । ननु राजपुरुष इत्यादिसमासे अर्थवत्सूत्रेण प्रातिपदिकसंज्ञाया अप्राप्तावपि कृत्तद्धितसूत्रे समासग्रहणात् प्रातिपदिकसंज्ञा भविष्यति । तत्र प्रत्ययान्तत्वेन कृत्तद्धितानां विषये पूर्वसूत्रेणाऽप्राप्तौ कृत्तद्धितसूत्रं विधायकं भवतीति चेत्, न, भाष्ये समासादिष्वर्थवत्त्वात् प्रातिपदिकसंज्ञामाशङ्क्य समासग्रहणस्य नियमार्थत्वमाश्रित्य परिहृतत्वेन समास-ग्रहणस्य नियमार्थत्व एव मुनितात्पर्यावधारणेन तद्विरुद्धकल्पना न कार्या । किञ्च कृत्तद्धितसूत्रे कृत्तद्धितविषये तदन्तग्रहणार्थमर्थवद्ग्रहणानुवृत्तिरावश्यकी । ननु समासस्य शक्त्यार्थवत्त्वाभावेऽपि लक्षणयाऽर्थवत्त्वस्य सत्त्वात् प्रातिपदिकत्वसिद्धिरिति चेत्, न, तत्र समासवाक्ये शक्तेरेवाभावे शक्यसम्बन्धरूपलक्षणाया अप्यभावेन लाक्ष-णिकार्थवत्त्वस्यापि दुर्वचत्वात् ।

ननु "तिप्तस्झि" इत्यादिसूत्रे तिप्रत्ययादारभ्य "स्वौजसमौडिति' सूत्रे पकारपर्यन्तं तिप्प्रत्याहारो भाष्यकारैरुक्तः, तमादाय 'अतिप्प्रातिपदिकमिति न्यासः क्रियते। गुरुभूतार्थवदादिसूत्रद्वयं नारम्भणीयम्। किञ्च 'अतिप्प्रातिपदिकं समासश्चे'ति न्यासः कार्यः। तदानीं तिबन्तभिन्नं प्रातिपदिकं, समासश्च प्रातिपदिकसंज्ञं भवतीत्यर्थसिद्धया सर्वलक्ष्यसङ्ग्रहान्न दोष इति चेत्, न, समासेऽपि प्रत्येकं वर्णेषु प्रातिपदिकसंज्ञावारणायार्थवत्त्वस्यावश्यकतया समासस्य अर्थवत्त्वाभावात् पूर्वसूत्रस्याप्रवृत्त्याऽतिव्याप्तितादवस्थ्यमेव। एवञ्च धूमो यथा वह्निमनुमापयति तथा प्रातिपदिकसंज्ञारूपं कार्यं समासेऽर्थवत्त्वमनुमापयति।

अनुमानप्रकारश्चेत्थम्—समास एकार्थीभावरूपशक्तिमान्। प्रातिपदिकसंज्ञावत्त्वात्, पङ्कजशब्दवत्। यन्नैवं तन्नैवम्, यथा—दशदाडिमानीत्याद्यनर्थकसमुदाय इति। एवञ्च वृत्तौ समुदायशक्तिर्दर्शनान्तरीयैरपि स्वीकार्या। स्पष्टञ्चेदं भूषणसारव्याख्याने तत्त्वदर्शिनीग्रन्थे अस्मद्गुरुचरणैः।

विशिष्टशक्त्यस्वीकारे मीमांसकम्मन्यानामधिकरणत्रयविरोधप्रदर्शनम्

मीमांसका वृत्तौ विशिष्टशक्तिं नैवाङ्गीकुर्वन्ति। तन्मते अधिकरणत्रयं विरुणद्धि। तथा हि—

(क) वषट्कर्त्रधिकरणविरोधः

तृतीयाध्याये पञ्चमपादे सोमयागप्रकरणे श्रूयते—"वषट्कर्तुः प्रथमभक्ष" इति। वषट्=देवतोद्देशेन हविस्त्यागसम्बन्धी मन्त्रविशेषः, तं करोतीति वषट्कर्ता। वषण्णामकमन्त्रोच्चारयिता होतृविशेषः। तत्रानेन वाक्येन प्राथम्यविशिष्टभक्षान्तरविधानमुत "होतृचमस' इति समाख्यया प्राप्तभक्षानुवादेन प्राथम्यविधिः। ततश्च समाख्यया यत्र वषट्कर्तुर्भक्षणं प्राप्तं तत्प्रथमं कर्तव्यम्। ततोऽन्यस्य भक्षणं कर्तव्यमिति तद्वाक्यार्थः। यत्र तु ग्रहेषु चमसान्तरेषु वा न समाख्यया भक्षणप्राप्तिस्तत्र सत्यपि वषट्कारे होत्रादेर्नास्ति भक्षणम्, यथा—ग्रावस्तुत इति पूर्वपक्षे, "वषट्काराच्च भक्षयेत्' इति जैमिनेस्सिद्धान्तसूत्रम्। अस्यायमर्थः—भक्षानुवादेन प्राथम्यविधान उद्देश्यस्य प्रथमप्रतीत्यवश्यम्भावाद्भक्षशब्देन प्रथमं तदर्थः प्रतिपाद्यः। न चैतत्सम्भवति। पदद्वयस्यापि विशिष्टैकार्थप्रतिपादकत्वाभावे एकार्थीभावलक्षणसामर्थ्याभावेन समासस्यैवानुपपत्तेः। तथा च प्रकृते प्राथम्यस्य पूर्वकर्मण्यनिवेशेन वषट्कर्तृ-प्राथम्योभयविशिष्टं भक्षान्तरमेव सोमसंस्कारार्थं विधीयते। तत्र च यागार्थत्वेन वषट्कारस्य क्लृप्तत्वात् कर्तुरुपलक्षणमात्रत्वेनार्थान्निमित्तत्वावगतेर्वषट्कारादिनिमित्तकमिदं भक्षणं ग्रहेषु, चमसेषु वा अविशेषात् सिद्धयति। एवञ्च

ग्रावस्तुतोऽपि भक्षणमस्त्येवेति सिद्धान्तितम् । व्यपेक्षावादिनोऽपि मीमांसका निरुक्तरीत्या विशिष्टैकोपस्थितिजनकत्वरूपैकार्थीभावभङ्गभिया उद्देश्यविधेयभावेनान्वयं नेच्छन्ति । विशिष्टशक्त्यनङ्गीकारे 'पदार्थयोरुद्देश्यविधेयभावेनान्वये पृथगुपस्थितिस्तन्त्रमिति' व्युत्पत्तिभङ्गापत्तिः ।

(ख) स्विष्टकृद्धोमाधिकरणविरोधः

किञ्च विशिष्टशक्त्यस्वीकारे मीमांसकानां दशमाध्यायस्थं 'स्विष्टकृद्धोमाधिकरणं' विरुणद्धि । तथा हि—दशमाध्याये 'इज्याशेषात् स्विष्टकृदिज्येत प्रकृतिवत् त्र्यङ्गैर्वा शरद्विकारः स्यात्' इति जैमिनेस्सूत्रम् । तत्र श्रूयते—'त्र्यङ्गैः स्विष्टकृतं यजतो'ति । तत्र पशौ चोदकप्राप्तः स्विष्टकृद्यागः प्रधानहविर्भ्यो हृदयादिभ्य उत्तरार्थं गृहीत्वा कर्तव्य उताङ्गान्तरेभ्य इति संशये प्रधानशेषप्रतिपत्त्यर्थत्वात् प्रकृतौ पशावपि प्रधानशेषेभ्यः स्विष्टकृद्यागः कर्तव्यः । त्र्यङ्गैरिति वचनन्तु त्रित्वविशिष्टाङ्गानामेव विधायकम् । तत्र चेज्याशेषाणामङ्गानां प्राप्तत्वात् प्राप्ताप्राप्तविवेकन्यायेन त्रित्वविधौ पर्यवसानं स्यात् । तेन तेषामेवाङ्गानां मध्ये त्रिभिरङ्गैः स्विष्टकृदिज्येतेति पूर्वपक्षे प्रथमभक्ष इत्यत्रेव त्र्यङ्गैरिति समासविधानानुपपत्त्या अङ्गानुवादेन त्रित्वं न विधीयते, किन्तु त्रित्वविशिष्टाङ्गान्तरविधानम् । तथा चेज्याशेषभूतहृदयातिरिक्तैस्त्रिभिरङ्गैः स्विष्टकृदिज्येतेति सिद्धान्तितम् । यदि विशिष्टशक्तिर्नाङ्गीक्रियेत तदा विशिष्टैकोपस्थितिजनकत्वरूपैकार्थीभावलक्षणसामर्थ्याभावेन समासानुत्पत्तौ त्र्यङ्गैरिति समस्तरूपं न स्यात् । तथा सति तदधिकरणमसङ्गतं स्यात् ।

(ग) अरुणाधिकरणविरोधः

किञ्च विशिष्टशक्त्यस्वीकारे अरुणाधिकरणस्य उत्थितिरेव न स्यात् । तथा हि ज्योतिष्टोमप्रकरणे श्रूयते—"अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीति" । तत्र प्रथमतः 'अरुणया क्रीणाति', 'पिङ्गाक्ष्या क्रीणाती'त्यादिना पार्ष्टिकबोधमङ्गीकृत्य पश्चाद्विशिष्टबोधोऽङ्गीकृतो मीमांसकैः । तत्र प्रथमतः प्राथमिकबोधे आरुण्यपदं वाक्याद्भित्वा प्रकरणे सर्वद्रव्येषु निविशते, उत क्रीणातिना सम्बध्य तदङ्गमेकहायन्यां निविशत इति संशये आरुण्यरूपगुणस्य अमूर्तत्वात् क्रयरूपक्रियासाधनत्वासम्भवेन पृथग्भूतोऽविशेषात् प्राकरणिकद्रव्यमात्रे निविशत इति पूर्वपक्षे अरुणापदस्य गुणितादात्म्येन गुणबोधकत्वाद् गुणिद्रव्यस्य च वाक्ये श्रुतत्वेन सन्निहितत्वादेकहायन्यैवेति विशिष्टविधिरयमिति तत्र सिद्धान्तितम् । तस्मिन्नधिकरणे एकहायनी-पिङ्गाक्षीपदयोर्द्रव्यवाचकत्वं सिद्धवत्कृत्यारुण्यांश एव पार्थक्येन पूर्वपक्षः कृतः । समासशक्त्यस्वीकारे पिङ्गाक्ष्यैकहायनीपदयोरपि पिङ्गाक्षित्वैकहायनत्वादिगुणमात्रवाच्यतया

तयोग्ग्यमूर्तत्वात् क्रीणातौ करणत्वासम्भवेन क्रीणातिकरणस्येतद्वाक्यादलाभादारुण्यस्य वाक्यभेदशङ्काया एवाऽसम्भवात् तदधिकरणासङ्गतिः स्पष्टैवेति ।

विशिष्टशक्त्यङ्गीकुर्वतां वैयाकरणानां मते निषादस्थपत्यधिकरणविरोधपरिहारः

अत्र मीमांसकाः—वृत्तौ विशिष्टशक्तिस्वीकारे निषादस्थपत्यधिकरणं विरुणद्धि । तथा हि—ऐन्द्रं वास्तुमयं चरुं निर्वपेदित्युपक्रम्य 'एतया निषादस्थपतिं याजयेत्' इति श्रूयते । तत्र सन्देहः—निषादानां स्थपतिरिति षष्ठीसमासाश्रयणेन, निषादः स्थपतिर्यस्येति बहुव्रीह्याश्रयणेन वा त्रैवर्णिकोऽत्राधिकारी उत निषादश्चासौ स्थपतिश्चेति कर्मधारयाश्रयणेन प्रभुर्निषादोऽधिकारी इति । तत्र कर्मधारयाश्रयणेनाऽविदुषो वेदानधिकारिणोऽत्र त्रैवर्णिकस्य अधिकारित्वकल्पनापेक्षया षष्ठीतत्पुरुषबहुव्रीह्योरन्यतरस्याश्रयणेन विदुषो वेदाधिकारिणोऽग्निहोत्रिणस्त्रैवर्णिकस्यैवाधिकारित्वकल्पनं कार्यमिति पूर्वपक्षे बहुव्रीहेः षष्ठीतत्पुरुषः प्रबलः, अन्तरङ्गत्वात् । ततोऽपि कर्मधारयोऽन्तरङ्गत्वात् प्रबलः । एवञ्च प्रबलस्य कर्मधारयस्य आश्रयणेन निषादस्यैव स्थपतेरधिकारः कल्प्यः । श्रुतिप्रामाण्याच्च निषादस्य तद्यागोपयोगिवेदाधिकारः कल्प्यत इति निषादस्थपत्यधिकरणे सिद्धान्तितम् ।

विशिष्टशक्त्यङ्गीकारे तेषां समासानामन्तरङ्गबहिरङ्गभावो न युज्यते । तथा च षष्ठीतत्पुरुषकर्मधारयबहुव्रीहीणां त्रयाणामपि शक्यार्थबोधने वैषम्याभावात् कर्मधारयस्यैवाश्रयणे विनिगमकाभावात् कर्मधारयप्राबल्येन मीमांसकोक्तनिषादस्थपत्यधिकरणविरोधस्तदवस्थ एवेति वदन्ति ।

निषादस्थपत्यधिकरणविरोधपरिहारः

अत्रायं सिद्धान्तः—शाब्दबोधाविदूरप्राक्क्षणेऽन्तरङ्गबहिरङ्गभावो विचार्यते । एवञ्च तत्पुरुषादीनां त्रयाणामपि शक्यार्थप्रतिपादकत्वाऽविशेषेऽपि निरुक्तरीत्या शक्तिग्रहादिकालिकमन्तरङ्गबहिरङ्गभावमादाय मीमांसकैरधिकरणरचना कृतेति न तद्विरोधः । उक्तञ्च —

> "पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षण स्थिते ।
> शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम्" ।। इति ।

अत्र कारिकायामन्तरङ्गबहिरङ्गशब्दौ लाघवगौरवपरौ ।

ननु लाघवमात्रेण नार्थनिर्णयसिद्धिः । अन्यथा बहुव्रीहित्वाभिव्यञ्जकसमासान्तादीनामभावे सर्वत्रापि कर्मधारयत्वापत्तेः । लाघवमात्रेण सर्वेषामपि धर्ममात्रवाचकत्वे विशिष्टशक्तेरुच्छेदप्रसङ्गाच्चेति चेत्, न, लाघवमात्रेण न प्रकृतार्थ-

सिद्धिः। किन्तु लाघवं तात्पर्यकल्पनायामुपयुज्यते। तेन च प्रकृतार्थसिद्धिः। निषादस्थपतिशब्दस्य नानार्थकतया ततो नानार्थोपस्थितो "नानार्थतात्पर्याद्विशेषावगतिरिति" न्यायेन तात्पर्यविषयीभूतार्थस्यैव बोधः नान्यस्य। तात्पर्यकल्पकन्तु लाघवादोति निषादस्थपतिशब्देन निषादरूपस्य स्थपतिरूपार्थस्यैवोपपत्तिर्नान्यस्येति तदधिकरणसिद्धान्तोपपत्तिः। स्पष्टञ्चेदं भूषणसारव्याख्याने तत्त्वदर्शिनोग्रन्थे अस्मद्गुरुचरणैरित्यलमतिविस्तरेण।

(घ) न पदान्तद्विर्वचनेत्यादिसूत्रार्थविचारः

"न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" इति पाणिनिसूत्रम्। अचः परस्मिन् पूर्वविधाविति सूत्रेण द्विर्वचनादिषु परेषु अजादेशस्य स्थानिवद्भावे प्राप्ते तन्निषेधार्थमिदं सूत्रमारब्धम्। अत्र सूत्रे पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्पदानां द्वन्द्वनिर्दिष्टानां सर्वेषां "द्वन्द्वान्ते श्रूयमाणं पदमिति" न्यायाद् विधिपदार्थेऽन्वयः। पदस्यान्तः पदान्तः। अन्तशब्दश्चरमावयववाचकः। विधानं विधिरिति विपूर्वकधाधातोः "उपसर्गे घोः कि"रिति भावे किप्रत्ययः। पदान्तस्य विधिः पदान्तविधिरिति कर्मषष्ठ्यन्तेन समासः। एवञ्च पदचरमावयवादिकार्यकर्मकविधाने परनिमित्तोऽजादेशः स्थानिवत् स्यादिति सूत्रार्थः। एतादृशार्थस्वीकारादेव 'वृक्षव्' इत्यत्र वलोपो वारितः। तथा हि—वृक्षं वेति इति वातीति वा विग्रहे वृक्षोपपदाद् "वी"धातो"र्वा"धातोर्वा क्विपि तदन्तादाचष्टार्थे "तत्करोति तदाचष्टे" इति सूत्रेण णिचि वृक्षवी+इ इति स्थिते ततो विच्प्रत्यये, इष्टवद्भावेन टिलोपे, विज्निमित्तकत्वेन "णेरनिटि" इति णिलोपे वृक्षव्+व् इत्यवस्थायां "लोपो व्योर्वलि" इत्यनेन वलि लोपो न भवति। णिलोपस्य, टिलोपस्य वा "अचः परस्मिन् पूर्वविधौ" इति सूत्रेण स्थानिवत्वाण्णिचा "टि" इत्यनेन वा व्यवधानाद् वलि लोपो न।

अत्र पूर्वपक्षः—वृक्षव्+व् इति स्थिते वलोपस्य पदान्तकार्यत्वान्न पदान्तेति निषेधाद्वलि लोपो दुर्वार इति।

अत्रेदं समाधानम्—लोपस्याभावरूपतया वयवत्वेनपदान न पदान्तसूत्रस्याप्रवृत्तेः। यदि विपूर्वक-'धा'धातोर्विधीयत इति विधिरिति कर्मणि किप्रत्ययः क्रियते, तदा कर्मण उक्तत्वात् कर्मषष्ठ्यप्राप्त्या सम्बन्धसामान्ये षष्ठीकृते पदान्तस्य स्थाने यो विधिस्तस्मिन् कर्तव्ये स्थानिवद्भावो नेत्यर्थलाभाद् वृक्षव्+व् इत्यत्र वलि लोपस्यापि पदान्तसम्बन्धित्वेन निषेधप्रवृत्तो वलिलोपापत्तिः स्यात्। अतस्तद्वारणाय

भावे क्विप्रत्यय इत्यभ्युपेयम्। तथा च पदस्य चरमावयवे कार्ये कर्तव्ये परनिमित्तोऽजादेशो न स्थानिवदित्यर्थो लभ्यते। तथा च लोपस्य पदानवयवत्वेन न वलोपप्रसङ्गः।

अत्र पुनः पूर्वपक्षः—प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्च इति वार्तिकेन प्रातिपदिकादेव णिचो विधानात् 'वृक्षव्' इति क्विबन्तस्य पदत्वाभावेन सामान्यत एवास्य सूत्रस्य प्रवृत्तौ किमर्थं चरमावयवपर्यन्तानुधावनमिति चेत्, न, सुबन्ताण्णिजिति हरदत्तादिमते प्रथमतः प्रातिपदिकात् सुबुत्पत्तिः। ततो णिचि, सुपो धातुप्रातिपदिकयोरिति सुब्लुकि 'वृक्षवी' इत्यस्य प्रत्ययलक्षणेन सुबन्तत्वात् पदसंज्ञा प्रवर्तते। ततो णिचि, टिलोपे, णिलोपे च कृते एकदेशविकृतन्यायेन वान्तेऽपि पदसंज्ञा वर्तते। अतः 'वृक्षव्' इत्यत्र वकारस्य पदान्तत्वात् तस्य लोपे कर्तव्ये स्थानिवत्त्वनिषेधाद् वलोपापत्तिवारणाय पदचरमावयवे कर्तव्य इत्यर्थोऽवश्यमाश्रयणीयः।

ननु इष्टवदित्यतिदिष्टेन भत्वेन पदसंज्ञाया बाधाद् वृक्षव्+व् इत्यत्र पदसंज्ञाया अभावादस्य निषेधस्याप्रवृत्तिरेवेति चेत्, अत्र णिचं निमित्तीकृत्य इष्टवद्भावेन प्राप्ताया भसंज्ञाया णेरनिटीति णिलोपेन निमित्तभूतस्य णेरभावेनाप्रवृत्त्या पदसंज्ञैव प्रवर्तते। न च 'वृक्षव्' इत्यत्र णिलोपस्य स्थानिवद्भावेन भसंज्ञा भविष्यतीति वाच्यम्, अनल्विधाविति निषेधेन णेर्विशेषणतया अलाश्रयणान्न स्थानिवद्भावः प्रवर्तते। तथा हि—'णाविष्टवदि'त्यनेन 'यचि भम्' इति शास्त्रस्यैवातिदेशः। तत्सूत्रेऽजादिप्रत्ययोऽपेक्षितः। अतो विशेषणतयाऽलाश्रयणा'दनल्विधावि'ति निषेधः प्रवर्तते। ननु कार्यातिदेशपक्षे णाविष्टवदित्यतिदेशेन भसंज्ञाविधानेन स्थानिवद्भावस्सिद्ध्यतीति चेत्, तदापि यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापोत्यर्थोऽङ्गीकार्यः। अन्यथा 'रामाय' इतिवद् रामस्येत्यत्रापि 'सुपि च' इति दीर्घापत्तिः। प्रकृतेऽत्र यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिः=कप्रत्ययावधिकस्वादिघटकस्वरूपनिमित्तवैकल्यस्य 'यचि भम्' इति शास्त्रस्याप्रवृत्तिः। अतस्तद् "णाविष्टवदि"त्यनेन अतिदिश्यते। तत्र तदतिरिक्तयजादित्वमस्त्येवेति कृत्वा विशेषणतया अलाश्रयणं भसंज्ञायाः स्पष्टमेव। एवञ्चात्र भसंज्ञा न भवति, किन्तु पदसंज्ञैव।

ननु 'वृक्षव्' इत्यत्र स्थानिवत्सूत्रेण भसंज्ञायां णिलोपस्य स्थानिवत्त्वाभावेऽपि "अचः परस्मिन्नि"ति सूत्रेण परनिमित्तोऽजादेशो णिलोपः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य 'वृक्षव्' इत्यस्य भसंज्ञायां कर्तव्यायामित्यर्थकेन स्थानिवद्भावः प्रवर्तत इति चेत्, न, तथा सति णिलोपस्यैव टिलोप-

स्यापि स्थानिवत्त्वापत्तौ वान्ते भत्वस्य दुर्लभत्वेन ईकारान्ते पदसंज्ञा, वान्ते भसंज्ञेति अनयोरेतादृशविषयभेदसत्त्वेन बाध्यबाधकभावाभावात् पदसंज्ञा निराबाधैव ।

एतत्सर्वं सुबन्ताण्णिजिति हरदत्तादिमतेन । तत्र अन्तर्वर्तिविभक्त्या सुबन्तत्वात् पदसंज्ञा प्रवर्तते । अतः पदान्तकार्यत्वात् स्थानिवद्भावनिषेधः प्राप्नोति । तद्वारणाय पदस्य चरमावयवे इत्यर्थो वक्तव्यः । तथा च 'वृक्षव्' इत्यत्र णिलोपस्य स्थानिवत्त्वाद्वलोपो न भवति । एतत्सर्वं हरदत्तादिमते ।

वस्तुतस्तु प्रातिपदिकाद्धात्वर्थे इति वचनेन प्रातिपदिकादेव णिचो विधानात् 'वृक्षव्' इत्यस्य पदत्वं नास्ति । अतो नेदमुदाहरणं पदचरमावयवे कार्यस्य । किन्तु "एषो यन् हसती"त्युदाहरणम् । अत्र इण्धातोर्लटश्शतरि, "इणो यण्" इति यणि, नुमि, संयोगान्तलोपे 'यन्' इति रूपम् । अत्र एषस्+यन्+हसतीति स्थिते एतत्तदोरिति सुलोपे कर्तव्ये स्थानिवद्भावनिषेधा न प्रवर्तते । लोपस्य पदानवयवत्वात् । तथा च यणः स्थानिवत्त्वेन हल्परकत्वाभावात् सुलोपो न भवति । तत एषस्+यन्+हसतीति स्थिते सस्य रुत्वे, तस्य "हशि च" इत्यनेनोत्वे उत्वस्य पदावयवत्वेन स्थानिवद्भावनिषेधाद् उत्वं निराबाधमित्येतदेव प्रयोजनं पदचरमावयवे स्थानिवद्भावनिषेधस्य । स्पष्टञ्चेदं प्रौढमनोरमाशब्दरत्नयोः ।

न पदान्तसूत्रस्थसवर्णस्योदाहरणप्रसङ्गः

न पदान्तसूत्रस्थस्वरसवर्णानुस्वारयोः स्थानिवद्भावाप्रवृत्तावुदाहरणं शिण्ढीति मनोरमाकाराः । तथा हि शिष्लृ व्याप्तावित्यस्माद्धातोः कर्तरि लोटि, सिपि, "रुदादिभ्यः श्नमि"त्यनेन श्नमि, सेर्ह्यादेशे, "हुझल्भ्यो हेर्धिः" इति हेर्धित्वे "श्नसोरल्लोपः" इत्यकारलोपे शिन्ष्+धि इति स्थिते ष्टुत्वे, जश्त्वे, "झरो झरि सवर्णे" इति वा डलोपे, "नश्चापदान्तस्ये"त्यनुस्वारे, परसवर्णे च कृते शिण्ढीति रूपम् । अत्र शिन्ड्+ढि इति स्थिते परनिमित्तोऽजादेशः अल्लोपः स्थानिवत् स्यादकारवत्त्वस्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य नकारस्यानुस्वारे कतव्ये इति स्थानिवद्भावे प्राप्ते अकारेण व्यवधानाज्झलपरकत्वाभावाद अनुस्वारो न

प्राप्नोति। तथा चानेन सूत्रेणानुस्वारे कर्तव्ये स्थानिवत्त्वनिषेधाद् अनुस्वारो भवति। अनन्तरं परसवर्णविषयेऽप्यनेन सूत्रेण स्थानिवद्भावनिषेधादनुस्वारस्य यञ्-परकत्व-माश्रित्य परसवर्णोऽपि भवति। एवञ्च सवर्णानुस्वारयोः शिण्ढीत्युदाहरणमिति तेषामाशयः।

शब्दरत्नकाराशयवर्णनम्

वस्तुतस्तु अनुस्वारस्येदमुदाहरणं भवितुमर्हति। तत्र स्थानिभूतादचः पूर्वत्वस्य सत्त्वात्। परन्तु सवर्णविषयेऽनुस्वारस्य स्थानिभूतादचः पूर्वत्वाभावेन स्थानिवद्भावप्रवृत्तिरेव नास्ति। तथा च सवर्णे इदमुदाहरणं न भवति।

अत्रेयमाशङ्का—ननु नकारे विद्यमानं स्थानिभूतादचः पूर्वत्वमनुस्वारेऽति-दिश्यते। तथा च स्थानिवद्भावस्य प्रवृत्तिरस्त्येवेति चेत्, न, अत्रातिदेशिकस्थानि-भूतादचः पूर्वत्वस्य सत्त्वेऽपि वास्तविकस्थानिभूतादच पूर्वत्वस्याभावात्। ननु सवर्णे कर्तव्ये स्थानिवद्भावनिषेधज्ञापकादेवानुस्वारेऽशास्त्रीयत्वेऽपि स्थानि-भूतादचः पूर्वत्वमतिदिश्यते। तथा चेदमुदाहरणमेवेति चेत्, न, ज्ञापकस्थले वैयर्थ्यं, स्वांशे चारितार्थ्यं, ज्ञापकत्वमन्यत्र फलञ्चेति पदार्थचतुष्टयमपेक्षते। प्रकृते ज्ञापनोत्तरं स्वांशे चारितार्थ्यसत्त्वेऽप्यन्यत्र फलाभावात्। किञ्चाकारयुतो नकारे-त्याकारकानुपूर्वीसहितस्थानिभूतादचः पूर्वत्वस्यानुस्वारे अतिदेशसहस्रेणाऽप्यति-देष्टुमशक्यत्वात्।

ननु स्थानिभूतादचः पूर्वत्वं नामाजवधिकत्वविशिष्टत्वम्। तच्च नानु-पूर्वीरूपम्, किन्त्वतिरिक्तो धर्मः। एतादृशाचः पूर्वत्वमनुस्वारेऽपि विद्यत एवेति चेत्, न, एतादृशाजवधिकत्वविशिष्टपूर्वत्वस्य नकारवृत्तित्वेन तस्य चाल्विधित्वे-नानल्विधाविति निषेधात्।

अत्र पुनः पूर्वपक्षः—एतादृशाचः पूर्वत्वं समुदायवृत्तिधर्मो मूलकृन्मते। यथा—"ससजुषो रुः" इत्यादौ। तथा च स्थानिवद्भावो भवत्येवेति चेत्, अज्रूपस्य हलो विशेषणतयाऽनाश्रयणात् स्थानिवद्भावो न प्रवर्तत एव।

अथवा अस्तु स्थानिवद्भावः। तथाऽपि न पदान्तसूत्रेण स्थानिवद्भावनिषेधो न प्रवर्तते। भाष्ये पूर्वत्रासिद्धे न स्थानिवदिति स्वोक्त्य वरेयलोपस्वरभिन्नं

न पदान्तसूत्रं प्रत्याख्यातम्। एवञ्च सवर्णविषये स्थानिवद्भावस्य सत्त्वेन यञ्परकत्वाभावात् परसवर्णो न भवत्येव। तथा चानुस्वारघटितमेव साधु।

ननु वार्तिके प्रतिपदोक्तणत्वस्यैव स्वीकारात् प्रकृते स्थानिवद्भावनिषेधे कृते यञ्परकत्वात् परसवर्णे शिण्ढीत्युदाहरणं युक्तमेवेति चेत्, न, रषाभ्यामिति सूत्रे अपदान्तस्य मूर्धन्य इत्यनुवृत्त्य नकारस्य मूर्धन्यो भवतीत्युक्ते आन्तरतम्याण्णकारो भवतीति णग्रहणं प्रत्याख्यातम्। एवञ्च सर्वस्यापि लाक्षणिकत्वान्नात्रेयं परिभाषा प्रवर्तते। किञ्च "दीर्घादाचार्याणाम्" इत्युत्तरं "अनुस्वारस्य ययि परसवर्णः", "वा पदान्तस्य", "तोर्लि" "उदःस्थास्तम्भोः पूर्वस्य", "झयो होऽन्यतरस्याम्", "शश्छोऽटि" इति षट्सूत्रीपाठोत्तरं "झलां जश् झशि", "अभ्यासे चर्च", "खरि च", "वाऽवसाने", "अणोऽप्रगृह्यस्यानुनासिक" इति पञ्चसूत्र्याः पाठ इति भाष्यसम्मताष्टाध्यायीपाठपक्षे परसवर्णदृष्ट्या जश्त्वस्यासिद्धत्वेन षकारस्यैव सत्त्वेन यय्परकत्वाभावात् परसवर्णाप्राप्तेस्सर्वथा परसवर्णघटकशिण्ढीत्युदाहरणमयुक्तमिति महान् पूर्वपक्षः।

अत्रोच्यते—एवं तर्हि न पदान्तसूत्रे सवर्णग्रहणस्य पाद्धसतीत्युदाहरणं भवितुमर्हति। तथा हि—पदधातोः क्विपि, क्विबन्तत्वेन प्रातिपदिकसंज्ञायाम्, ततो णिचि पुनः क्विपि, 'णेरनिटि' इति णिलोपे, उपधावृद्धौ, विभक्तिकार्ये 'पाद्' इति रूपम्। अत्र पाद्+हसतीति स्थिते 'झयो होऽन्यतरस्यामि'त्यनेन हस्य पूर्वसवर्णे पाद्धसतीति रूपम्। अत्र 'अचः परस्मिन्' इति सूत्रेण परनिमित्तः अजादेशो णिलोपः स्थानिवत् स्यात्। स्थानिभूतादचः पूर्वस्मात् परस्य हस्य पूर्वसवर्णे कर्तव्ये इत्यनेन स्थानिवद्भावे प्राप्ते अनेन सूत्रेण सवर्णे कर्तव्ये स्थानिवत्त्वनिषेधात् पूर्वसवर्णो भवति।

नन्वत्र 'क्वौ लुप्तं न स्थानिवदि'त्यनेनैव स्थानिवत्त्वनिषेधसिद्धौ नेदमस्य सूत्रस्यासाधारणं प्रयोजनमिति धिया हरिद्धसतीत्युदाहरणान्तरमुक्तम्। हरितमाचष्ट इत्यर्थे हरितशब्दात् 'तत्करोति तदाचष्टे' इति णिचि, ततः क्विपि इष्टवद्भावेन टिलोपे, णिलोपे च कृते ततो हसतीत्यनेन सम्बन्धे हरित्+हसतीति जाते परनिमित्तोऽजादेशः टिलोपः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वस्मात् परत्वेन दृष्टस्य हकारस्य पूर्वसवर्णे कर्तव्ये इति स्थानिवद्भावे प्राप्ते न पदान्तेति निषेधात् झयः परोभूतस्य हस्य पूर्वसवर्णे हरिद्धसति इति निराबाधम्। नाऽत्र क्वौ लुप्तमित्यस्य प्राप्तिः। टिलोपस्यैव स्थानिवत्त्वात्।

ननु पञ्चमीसमासस्यानित्यत्वात् तदभावे न पदान्तसूत्रस्येदं कथमुदाहरणं भवतीति चेत्, तर्हि हरिन्नमतीत्येवासाधारणं प्रयोजनमस्य सवर्णग्रहणस्य। तथा हि—हरितमाचष्ट इत्यर्थे हरितशब्दाण्णिचि, क्विपि, टिलोपे, णिलोपे च कृते ततो नमतोत्यनेन योगे हरित्+नमतीति स्थिते 'यरोऽनुनासिकेऽनुनासिको वा' इत्यनुनासिके हरिन्नमतीति रूपम्। अत्र हरित्+नमतीति स्थिते परनिमित्तोऽजादेशष्टिलोपः स्थानिवत् स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य तकारस्यानुनासिके कर्तव्ये इति स्थानिवद्भावे प्राप्तेऽनेन स्थानिवत्त्वनिषेधादनुनासिके कृते 'हरिन्नमति' इति सिद्ध्यति। ननु यरोऽनुनासिके इति सूत्रे सवर्णपदाभावेन कथमस्य सवर्णविधित्वमिति चेत्, न, अत्र सूत्रे 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रात् सवर्णग्रहणमपकृष्यते। एवञ्चेदमपि सवर्णविधायकं भवति। इदं 'हयवरट्'सूत्रभाष्याज्ज्ञायते। तत्र हि—चतुर्+मुख इति स्थिते रेफस्यानुनासिकत्वं कुतो न स्यादित्याशङ्क्य 'रेफोष्मणां सवर्णा न सन्ती'ति समाहितम्। तेनास्य सवर्णविधित्वं स्पष्टमेवेति दिक्।

सहायकग्रन्थसूची

ग्रन्थः	ग्रन्थकर्ता	प्रकाशकः	प्रकाशनवर्षम्
१. अनर्घराघवम्	मुरारिः	चौखम्बाविद्याभवनम्, वाराणसी	वि० सं० २०३२
२. अम्बाकर्त्री	पं० रघुनाथशर्मा	सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी	वि० सं० १८७२ १९५१ ख्रिस्ताब्दः
३. किरातार्जुनीयम्	भारविः	चौखम्बा संस्कृत सीरीज आफिस, वाराणसी	सन् १९६१
४. कुमारसम्भवम्	कालिदासः	काशी-हिन्दू-विश्वविद्यालयः, वाराणसी	सन् १९८६
५. काशिकावृत्तिः	वामनजयादित्यौ	प्राच्यभारतीप्रकाशनम्, वाराणसी	सन् १९६५
६. वैयाकरणसिद्धान्तकौमुदी	भट्टोजिदीक्षितः	चौखम्बा-संस्कृत-संस्थान, वाराणसी	वि० सं० २०३६
७. वैयाकरणसिद्धान्तकारिकाः	भट्टोजिदीक्षितः	आनन्दाश्रम-मुद्रणालयः, पुण्यपत्तनम्	सन् १९७८
८. वैयाकरणसिद्धान्तलघुमञ्जूषा	नागेशभट्टः	चौखम्बा संस्कृत सीरीज आफिस, वाराणसी	सन् १९६७
९. वैयाकरणभूषणसारः	कौण्डभट्टः	अजन्ता प्रिन्टर्स कोल्लूर, आन्ध्रप्रदेश	सन् १९७०
१०. व्याकरणमहाभाष्यम्	पतञ्जलिः	मोतीलाल-बनारसीदास, दिल्ली	सन् १९६७
११. वाक्यपदीयम्	भर्तृहरिः	सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयः, वाराणसी	सन् १९८०

2333

१२. लघुशब्देन्दुशेखरः (द्वितीयं संस्करणम्)	भट्टनागेशः	चौखम्बा संस्कृत संस्थान, वाराणसी	सन् १९८७
१३. भाट्टरहस्यम्	खण्डदेवः	मानवसंसाधनविकास-मन्त्रालयः, नवदेहली	सन् १९८५
१४. पदमञ्जरी	हरदत्तमिश्रः	प्राच्यभारतीप्रकाशनम्, वाराणसी	सन् १९६५
१५. प्रौढमनोरमा	भट्टोजिदीक्षितः	चौखम्बा संस्कृत सीरीज आफिस, वाराणसी	सन् १९३९
१६. प्रौढमनोरमा	भट्टोजिदीक्षितः	काशीहिन्दूविश्वविद्यालयः, वाराणसी	सन् १९६४
१७. परिभाषेन्दुशेखरः	नागेशभट्टः	चौखम्बा संस्कृत संस्थान, वाराणसी	सन् १९७८
१८. पदवाक्यरत्नाकरः	गोकुलनाथोपाध्यायः	वाराणसेयसंस्कृत-विश्वविद्यालयः, वाराणसी	सन् १९६०
१९. पातञ्जलं महाभाष्यम्	पतञ्जलिः	वाणीविलासप्रकाशनम्, वाराणसी	सन् १९८७
२०. वैयाकरणसिद्धान्तकौमुदी	भट्टोजिदीक्षितः	मोतीलाल बनारसीदास, वाराणसी	सन् १९७५
२१. परिभाषेन्दुशेखरः	नागेशभट्टः	वासुदेवशास्त्री पटवर्धनः	वि० सं० २०३९

सुसङ्ग्राह्याणि अभिनवप्रकाशनानि

१. शिवमहिम्नःस्तोत्रम्—(द्वितीयं संस्करणम्)—स्तोत्रमिदं 'मधुसूदनी', 'नारायणी'-प्रभृतिभिः संस्कृतटीकाभिः, अथ च हिन्दी-पद्यानुवाद-हिन्दी-व्याख्यादिभिः सनाथीकृत्य प्रकाशितम्— १००-००

२. गर्गसंहिता (द्वितीयं संस्करणम्)—पुराणविषयकोऽयं संहिताग्रन्थः श्रीमद्भागवतमहापुराणस्य पूरकरूपेणैव प्रसिद्धोऽस्ति। षट्खण्डात्मकोऽयं ग्रन्थः—१. गोलोकखण्डः, २. वृन्दावनखण्डः, ३. गिरिराजखण्डः, ४. माधुर्यखण्डः, ५. मथुराखण्डः, ६. द्वारकाखण्डश्च— २२०-००

३. वैयाकरणसिद्धान्तलघुमञ्जूषा—ग्रन्थरत्नमिदं श्रीदुर्बलाचार्यकृतया 'कुञ्जिका'-व्याख्यया, श्रीबालम्भट्टकृतया "कला-व्याख्यया, अथ च व्याकरणशास्त्रस्वतःप्रमाणभूतैराचार्यश्रीरामप्रसादत्रिपाठिभिः प्रणीतया 'सरला'-हिन्दीभाषा-व्याख्यया च समेधितं सत् प्रकाशितम्— प्रथमो भागः २००-००
द्वितीयो भागः १५०-००

४. दशपाद्युणादिवृत्तिः (द्वितीयं संस्करणम्)—व्याकरणशास्त्रस्यापूर्वोऽयं ग्रन्थः सरस्वती-भवनस्थ-हस्तलिखितपाण्डुलिपीनाधारीकृत्य सुसम्पाद्य प्रकाशितः— २३२-००

५. वाक्यपदीयम्—आचार्यभर्तृहरिप्रणीतो व्याकरणशास्त्रस्य महनीयोऽयं ग्रन्थो हरिवृषभ-कृतया 'प्रकाश'-व्याख्यया, पण्डितश्रीरघुनाथशर्मकृतया 'अम्बाकर्त्री'-व्याख्यया च सनाथीकृत्य सुसम्पाद्य प्रकाशितः—

ब्रह्मकाण्डः — ६४-०० वाक्यकाण्डः — ४६-००
पदकाण्डे प्रथमो भागः — १००-०० पदकाण्डे द्वितीयो भागः — २३०-००
पदकाण्डे तृतीयो भागः — ६५-५०

६. कातन्त्रव्याकरणम्—आचार्यशर्ववर्मप्रणीतो व्याकरणशास्त्रस्यापूर्वोऽयं ग्रन्थः श्रीदुर्गसिंहकृताभ्यां कातन्त्रवृत्ति-टीकाभ्यां श्रीमत्त्रिलोचनदासकृतया 'कातन्त्रवृत्तिपञ्जिका'-टीकया, कविराजसुषेणशर्मकृतया 'कलापचन्द्र'-टीकया, अथ च डॉ० जानकीप्रसाद-द्विवेदिकृतया समीक्षया, विवरणात्मिकया भूमिकया, अनुसन्धानात्मकपरिशिष्टैश्च सनाथीकृत्य सुसम्पाद्य प्रकाशितः— प्रथमो भागः — ३५०-००

७. शब्दशास्त्रीयवृत्तिविमर्शः—ग्रन्थोऽयम् आचार्यबदरीनाथशुक्लस्मृति-व्याख्यानमालायाम् आचार्यश्रीरामप्रसादत्रिपाठिमहोदयैः पठितानां निबन्धानां सङ्कलनरूपेण प्रकाशितः। ग्रन्थेऽस्मिन् आचार्यश्रीत्रिपाठिभिः शक्ति-लक्षणा-व्यञ्जनाख्य-वृत्तीनां विस्तृतरूपेण व्याख्यानं कृतमस्ति— ७५-००

८. वैष्णवागमविमर्शः—ग्रन्थोऽयं म० म० गोपीनाथकविराजस्मृति-व्याख्यानमालायाम् आचार्यश्रीव्रजवल्लभद्विवेदिमहोदयैः पठितानां निबन्धानां सङ्कलनरूपेण प्रकाशितः। ग्रन्थेऽस्मिन् विदुषा लेखकेन त्रिविधानां वैष्णवागमानाम्, दशविधानां वैष्णवसम्प्रदायानाञ्च विस्तृतं विवेचनं कृतम्, अन्ते च जितन्तेस्तोत्रं संयोज्य ग्रन्थस्यास्य श्रीवृद्धिः कृताऽस्ति— १००-००

९. शारदातिलकम्—श्रीलक्ष्मणदेशिकेन्द्रविरचितस्तन्त्रशास्त्रस्य मूर्द्धन्योऽयं ग्रन्थः श्रीमद्राघव-भट्टकृतया 'पदार्थादर्श'-व्याख्यया सनाथीकृत्य सुसम्पाद्य प्रकाशितः—
प्रथमो भागः — १५०-००

१०. खण्डनखण्डखाद्य—प्रमापक्ष—वेदान्तदर्शनस्यापूर्वोऽयं ग्रन्थः स्वामिश्रीगुरुशरणा-नन्दमहाराजैः प्रणीतः। ग्रन्थेऽस्मिन् खण्डनखण्डखाद्य-ग्रन्थान्तर्गतप्रमापक्षस्य साङ्गोपाङ्गनिरूपणपूर्वकं खण्डनसम्बन्ध्याक्षेपाणां समाधानादिकं सुविशदमनुसन्धाना-त्मकशैल्या हिन्दीभाषायां निरूपितम्— ३००-००

पत्रव्यवहारसङ्केतः—प्रकाशनाधिकारी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी—२२१००२